सुष्ठु पिवासा सुपिवासा यद्यपि जाताऽस्य, तेन तु छिन्नावातेसु पंथेसु तृष्णया परिशुष्यते मुखं, तथाप्यसौ परिसुक्कमुहो दीणो शुष्क(ष्य)ते स्म शुष्कः सर्वतः शुष्कमुखः परिशुष्कमुखः, बहिरंतश्चेति, दीयते दीनमानं वा दीनं, न तां तृष्णां तितिक्षन्, सहमान इत्यर्थः, सर्वतो व्रजते परिव्रजते, ग्रामे नगरे पथि वा सर्वत्र सर्वतः। जहा केण अहियासितो ?, तत्र नदी इति दारं, उदाहरणं–'उज्जेणी धणमित्तो' गाहा (९०–८१), एत्थ उदाहरणं किंचि पडिक्खेण किंचि अणुलोमेण, उज्जेणी नगरी, तत्थ धणमित्तो णाम वाणियगो, तस्स पुत्तो सम्मधम्मो(धणसम्मो)णाम दारओ, सो धणमेत्तो तेण पुत्तेण(समं)पव्वइतो, अन्नया ते साहू मज्झण्ह-वेलाए एलकच्छपहे पट्ठिता, सोऽवि खुड्डतो तण्हाइतो मग्गतो जाते, सोऽवि से खंततो सिणेहाणुरागेण पच्छतो एइ, साहुणोऽवि पुरतो वच्चंति, अंतराविं नदी समावडिया, पच्छा तेण वुच्चति-एहि पुत्त ! इमं पाणियं पियाहि, सोऽवि खंतो नदिं उत्तिण्णो, चिंतेइ य-मणागं ओसरामि जावेस खुड्डओ पाणियं पियइ, मा मम संकाए न पाहिति, एगंते पडिच्छइ जाव खुड्डओ पत्ते णदी, ण पिबतित्ति, केई भणंति-अंजलीए उक्खित्ताए अह से चिंता जाता-पियामित्ति, पच्छा चिंतेति–कहमहं एते हालाहले जीवे पिबिस्सं?, ण पीयं, आसाए छिन्नाए कालगओ, देवेसु उववन्नो, ओही पउत्ता, जाव खुड्डगसरीरं पासति, तहिं अणुपविट्ठो, खंतं लयति, खंतो एतीति पत्थितो, पच्छा तेसिं तेण देवेण साधूणं तिसिताणं गोउलाणि विउव्वियाणि, साधूवि तासु वदियाई-सु तक्कादीणि गेण्हंति, एवं वइयापरंपरएण जाव जणवयं संपत्ता, पच्छिच्छाए वइयाए तेण देवेण वेंटिता पम्हुसाविया जाणणा-णिमित्तं, एगो साधू णियत्तो, पेच्छति वेढियं, णत्थि वइया, पच्छा तेण णायं सादेवत्ति, पच्छा तेण देवेण वंदिया साहुणो, न खंतो, तं च सव्वं परिकहेति, भणति-तेण अहं परिचत्तो, तुमं एतं पाणियं पिवाहित्ति, जइ मे तं पीतं होंतं तो संसारं भमंतो, पडिगतो,

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [१] गाथा ||५१-५२||

दीप अनुक्रम [५३-५४]



श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ५६ ॥

एवं अहियासेतव्वं, पिपासापरीसहो गतो ॥ इदाणिं सीयपरीसहो 'चरंतं विरयं लूहं' सिलोगो(५६सू०८८) गामाणुगामं धम्मं वा चरंतं, विरतं अग्गिसमारंभातो गृहारंभतो वा, बाह्याभ्यंतरस्नेहपरिहारा, स्निग्धाहारस्य हि अभ्यंगितस्य वा नातिशीतं भवति, (अणेरिसं) अनातीतं शीतं स्पृशति-अभिद्रवति एगता-सिसिरे, अहवा एगता रात्रौ, यद्यप्यहनि सीतेण परितावि्ज्जंतोऽवि, णातिवेलं विहन्नेज्जा, न प्रतिषेधे, वेला सीमा मर्यादा सेतुरित्यनर्थांतरं, तामतीत्य वेलां विहन्येत-विविधैः प्रकारैः हन्येत, यद्यपि शरीरतो विहन्येत अप्रावृतत्वात् तहावि ण विहण्णेज्ज कंपनधूपनादिभिः, पासयति पातयति वा पापं, दर्शनं दृष्टिः,पापे यस्य दृष्टिः स पापदिट्ठी, योऽभियोगं मन्यते, अविदितपरमार्थत्वात् सः, न पापदृष्टिः, संसारसद्भावदर्शनात्,न शीतादुद्विजते,इदं हि शीतं सकामस्य सहनीयं, (अकामेन) नरकेष्वपि, काश्यपेनोच्यते चान्यथा'णातिवेलं मुणी गच्छे, सोच्चाणं जिणसासणं' जिनानां शासनं जिनशासनं तत् जिनशासनं श्रुत्वा, तत्र हि विचित्रसंसारस्वभावं नरकेषु अतिशीतवेदना, तथा तिर्यक्ष्वपि निष्परित्राणेन शीतान्यनुभूतानि, नो चैवं कदाचिदपि चिंतयति-'ण मे ति णिवारणं अत्थि' सिलोगो(५५सू०८८) व्रियते येन तद्वारणं नियतं निश्चितं निपुणं वा वारणं निवारणं प्रावरणमित्यर्थः कंबलालियाठु, छविस्त्राणाय भविष्यति ततोऽपदिश्य(श्य)ते-छविस्त्राणं न विद्यते, छ्यति छिद्यते वा च्छविं त्वगित्यर्थः, असौ हि शीतोष्णादीनां ग्राहिकेतिकृत्वा न शीतत्राणाय,तदेवमत्राणः अशरणश्च शीतवातानुगतः अहं तु अग्गिं सेवामि, अहं तु अनुमतार्थे संप्रेषणे वा, किमिदानीं करिष्यामि अत्राणो अशरणश्च ? तदिदानिमग्गिं सेवामि, इति भिक्खू ण चिंतए, अत्रोदाहरणं, लेणंदि दारं, तत्थ गाहा ' रायगिहंमि वयंसा ' गाहा (९१-८९) रायगिहे नगरे चत्तारि वयंसा वाणियगा सहवड्ढितया, ते भद्दबाहुस्स अंतिए धम्मं सोच्चा पव्वइया, ते सुत्तं बहुं अहेज्जित्ता अण्णया

शीत-परीषहः ॥ ५६ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ||५५-५७||

दीप अनुक्रम [५५-५७]

कयाति एगल्लविहारपडिमं पडिवन्ना, ते समावन्नीए विहरंता पुणोवि रायगिहं नगरं संपत्ता, हेमंतो वट्टति, ते य भिक्खं काउं ततियाते पोरिसीए (निग्गता) तेसिं वेब्भारगिरिंतेण गंतव्वं, तत्थ पढमस्स गिरिगुहाबारे चरिमा पोरिसी ओगाढा, सो तत्थेव ठितो, बितियस्स उज्जाणे, ततीयस्स उज्जाणसमीवे, चउत्थस्स णगरब्भासे चेव, तत्थ जो गिरिगुहब्भासे चेव तस्स निरायं सीयं, जो सम्मं सहंतो खमंतो य पढमजामे चेव कालगतो, एवं जो णगरसमीवे सो चउत्थे जामे कालगतो, तेसिं जो णगरब्भासे तस्स णगरुम्हाए ण तहा सीतं, तेण पच्छा पच्छा कालगता, ते संमं कालगता, एवं संमं अहियासेयव्वं जहा तेहिं चउहिं अहियासियं, सीयपरीसहो गतो ॥ सीयपडिपक्खे उण्हं, तदेव उच्यते--'उसिणपरितावेण' सिलोगो (५६ सू० ८९) उषतीत्युष्णं समयकृता वा उसिणमिति (संज्ञा), उष्णाभिघानमेव, सर्वतः तापः परितापः, बाह्याभ्यंतर इत्यर्थः, ' उवरिं तावेइ रवी रविकरपरितावित्ता दहइ भूमी । सव्वादो परिदाहो दसमलपरिगंतगा तस्स ॥ १ ॥' तृष्णया च सर्व्वांगितो दाहो परिदाहो, तर्जितो भर्त्सितः, स्यात्-उष्णं कस्मिन् काले भवतीत्युच्यते--' घिंसु परितावेणं ' ग्रसत इति ग्रीष्मः घिंसु वा देशतः समयतो वा स्यात्, किमत्रापि?, उक्तं येन ग्रीष्मे विशिष्यते ?, उच्यते, शरदिव तस्मिन् ग्रीष्मे शरदि वा उष्णपरितापितः 'सातं णो परिदेवए' सव्वेज्जं सातमिति सातं, परिदेवनं क्रन्दनं स्थानं आह्वानमित्यर्थः, कथं मे सातं स्यात्, शीतसुखमित्यर्थः, शीतलो वा कालः स्यादिति । ' उण्हाभि ' सिलोगो (५७ सू० ९०) दहति तेनेत्युष्णं तेण उण्हाभितप्तेन, मेहया धावतीति मेधावी, स्नायते येन सर्वाङ्गिकं स्नानं, अभिमुखं प्रार्थयेत् कृ(भू)शं वा अर्थयति, देशस्नानमपि प्रासुकेनांभसा, ' गायं नो परिसिंचेज्जा ' सर्वतः सिंचति, णो व वीएज्जा हस्तवस्त्रपात्रादिभिर्ण वीएज्जा य अप्पगं, जहा केण अहियासियं, तत्थ सिलाह-

॥ ५७ ॥

श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ५८ ॥

रणस्स इमा उदाहरणगाहा— 'तगराइ अरिह' सिलोगो (९२—९०) तगरा णगरी, तत्थ अरिहमित्तणाम आयरिओ, तस्स समीवे दत्तो नाम वाणियओ भद्दाभारियओ पुत्तेण य अर्हन्नगेण सद्धिं पव्वइतो, सो तं खुड्डगं ण कइयाइ भिक्खाए हिंडावेति, पढमालियादीहिं किमिच्छिएहिं पोसेति, सो सुकुमालो, साहूण अप्पत्तियं, ण तरति किंचि भासिउं, अन्नया सो खंतो कालगतो, साधुहिं तस्स दो तिन्नि व दिवसे दाउं भिक्खस्स उत्तारिओ, सुकुमारसरीरो सो गिम्हे उवरिं हेट्ठा डज्झंतो पासे य, तण्हाभिभूतो छायाए वीसमंतो पउत्थवइयाए वणियमहिलाए दिट्ठो, उरालसुकुमालसरीरचिक्काउं तीसे तंहिं अज्झोववातो जातो, चेडीए सद्दाविओ, 'किं मग्गसित्ति', भिक्खं, दिन्ना से मोयगा, पुच्छिओ—कीस तुमं धम्मं करेसि ?, भणति-सुहनिमित्तं, भणति-तो मए चेव समाणं भोगे भुंजाहि, सो उण्हेण तज्जितो उवसग्गिज्जंतो य पडिभग्गो, भोगे भुंजति, सो साहूहिं सव्वहिं मग्गिओ, न दिट्ठो, अप्पसागारियं पविट्ठो, पच्छा से माता ओमत्तिया जाता, पुत्तसोगेण, णगरं भमति अरहण्णयं विलवंती, जं जहिं पासति तं तंहिं सव्वं भणति—अत्थि ते कोइ अरहन्नतो दिट्ठो ?, एवं विलवमाणी भमति, जाव अन्नया तेण पुत्तेण ओलोयणगतेण दिट्ठा, पच्चभिण्णाता य, तहेव उत्तरित्ता पाएसु पडितो, तं पेच्छिऊण तहेव वीसत्थचित्ता जाता, ताए भण्णति-पुत्त ! पव्वयाहि, मा दुग्गतिं जाहिसि, सो भणति-ण तरामि काउं संजमं, जइ परं अणसणं करेमि, एवं करेहि, मा य असंजमो भवाहि, मा संसारं भमिहिसि, पच्छा सो तहेव तत्ताए सिलाए पाओवगमणं करेति, मुहुत्तेण सुकुमालसरीरो सो उण्हेण विराओ,पुव्वं तेण णाधियासितो पच्छा अहिआसीओ,एवं अधियासितव्वं,उसिणपरीसहो गतो॥इदाणिं दंसमसगपरीसहो 'एट्ठो य दंसमसएहि' सिलोगो (५८ सू० ६१) स्पृष्टत्वात् स्पृष्टः, सहारिभिः समरं, वक्ष्यति 'नागो व' त्ति,

उष्ण-परीषहः


॥ ५८ ॥

व्यवहिताभिधानमेतत्, महान्तं मुनतीति महामुनिः, ' नागो संगामसीसे वा ' नास्य किंचिदगम्यं नागः, समं ग्रामत इति संग्रामः, शीर्यत इति शिरः श्रिताः तस्मिन् इति प्राणा वा शिरः, शवत्यसौ युद्धं मुंचति वा तमिति शूरः, यथाऽसौ नागः सौरं शरैरभिहन्यमानः शूरो वा योधः परानभिहंति, परे नाम शत्रवः, एवमसामपि दंशमशकैः तुद्यमानोऽपि मोहशत्रुं विजिगीषुः तान्न गणयति. अन्येऽपि यूकामत्कुणादयोऽवगृह्यन्ते, स तैस्तुद्यमानोऽपि ' न संतसे ण वारेज्जा ' सिलोगो (५९ सू० ९१) संत्रसति अंगानि कंपयति विक्षिपति वा, न चैव हस्तवस्त्रशाखाधूमादिभिस्तान्निवारणोपायैर्वारयति, न चैषामसंज्ञित्वात् आहारकांक्षिणां, भुंजमानानां मच्छरीरं साहारणं, यदि भक्षयन्ति किं ममात्र प्रद्वेषोत्पातेः, ण 'मणंपि ण पदोसए' अपि पादार्थादिषु, किमुपायेन वा निवारणमभिघाते?, ' उवेह ण हणे पाणे ' उवेहा णाम उपेक्षा, न वारयति खाद्यमानं शरीरं, हणे पाणे ' हन हिंसागत्योः ' प्राणा अस्य संतीति प्राणी, अतस्तेन प्राणे न हिंसेत इत्यर्थः, ते हि केवलमेव मांसशोणितं भुंजते, न मामात्मद्रव्यं वा, अत्रोदाहरणं पथेत्ति, अत्रोदाहरणगाहा–' चंपाए सुमिणभद्दो ' गाहा (९३-९२) चंपाए नयरीए जियसत्तुस्स रन्नो पुत्तो सुमणभद्दो जुवराया, धम्मायरियस्स अंतीए धम्मं सोऊण निविन्नकामभोगो पव्वइतो, तहच्चेव एगल्लविहारपडिमं पडिवन्नो, पच्छा हेट्ठाभूमीए विहरंतो सरयकाले अडवीए पडिमागतो, रत्तिं मसएहिं खज्जति, सो ते ण पमज्जति, संमं सहति, रत्तिं पियमाणितो कालगतो, एवं अहियासेतव्वं, दंसमसगपरीसहो गतो । इदाणिं अचेलगपरीसहोऽवीय इति, अचेलं-अचेलगत्तं परीसहतीति अचेलगपरीसहो, तस्य हि स्वयमेव अचेलगत्वमभ्युपगम्य नैवमुपपद्यते-' परिजुन्नेहि वत्थेहिं ' सिलोगो (६०सू ९२) वस्त्र इति वस्त्रं परि सर्वतोभावे सर्वतो जीर्णानि परिजीर्णानि, परिभुज्यमानानि परिजुन्नाणि से वत्थाणि, अतो तेहिं परिजुन्नेहिं,

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [१] गाथा ||६०-६१||

दीप अनुक्रम [६०-६१]



श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ६० ॥

होक्खामित्ति अचेलए, तस्स एवं अधिति भवति-परिजीर्णेषु सत्सु अचेलगो इदाणिं भविस्सामित्ति, यच्च दुःखमचेलकत्वं, कथमिदानिं शिष्यो इमं दिट्ठंतं अंगीकरेतुं अहियासेज्जा?, यथा यस्य वित्तं नास्ति स हि न वित्तनिमित्तैरुपद्रवैर्बाध्यते, उक्तं हि- 'परिग्रहेष्वप्राप्तनष्टेषु कांक्षाशोकैः' अपि च-'कतिया वच्चति सत्थो? किं भंडं?' कत्थ? केत्तिया भूमी? । को कयविक्कयकालो? णिव्विसति किं? कहिं? केण? ॥ १ ॥ अयं चापरो गुणः-स्वयमेवाचेलत्वे प्रत्यागते 'अथवा सचेलगो सोमि' त्ति, तस्य हि अचेलकत्वे सति न कदाचित् अप्युपपद्यते-अहं वस्त्रवान् शोभामीति, अन्यानि वा शोभनतराणि वस्त्राणि मृगयिष्ये यैः शोभिष्ये, इत्येवमसौ भिक्षुर्न चिंतयति, उक्तं च—पंचहिं ठाणेहिं संमं पुरिमपच्छिमाणं अरिहंताणं भगवंताणं अचेलगे पसत्थे भवति, तं०-अप्पा पडिलेहा१ विसासिए रूए२तवे अणुमये३लाघवे पसत्थे४विपुले इंदियणिग्गहे५' अतिप्रसक्तार्थनिवृत्तये व्यपदेश्यमाने मा भूदपर्याप्तोऽपि अचेलकत्वं करिष्यतीत्यर्थः ॥ 'एगता अचेलगे भवति' सिलोगो (६१ सू० ९२) एगता नाम जदा जिणकप्पं पडिवज्जति, अहवा दिवा अचेलगा भवति, ग्रीष्मे वा, वासासुवि वासे अपडिंते ण पाउणंति, एवमेव एगता अचेलगो भवति, 'सचेले यावि एगता' तंजहा-सिसिररातीए वरिसारत्ते वासावासे पडंते भिक्खं हिंडंते, पठ्यते च 'अचेलओ सयं होइ' अचेलओ स्वयमेव, नाभियोगत इत्यर्थः, अहवा यदाऽस्य चीराण्युत्पद्यंते तदा सचेलको जीर्णे अलभ्यमाने वा अचेलकः, सर्वथाप्यचेलकत्वमेव स्यात्, कमालंबनं कृत्वाऽचेलकत्वेन सहितः ?, उच्यते, 'एयं धम्महितं णच्चा, 'णाणी णो परिदेवए' एतदिति यदुपदिष्टं धर्मस्य हिताय, न धर्मापरोधायेत्यर्थः, धम्मोवग्गहकारं णाऊणं, णाणी णो परिदेवए, णाणिग्गहणं विदितपरापरत्वान्न लज्जते, प्रायस्तिर्यञ्चो नग्ना, नारकास्तु नग्ना एव, न हि ते लज्जंते, न चैवं(षां)शीतवातपरित्राणानि संति वासांसि,

अचेलक-परीषहः

॥ ६० ॥

प्रत सूत्रांक [१] गाथा ||६०-६१||

दीप अनुक्रम [६०-६१]

मयापि च नारकतिर्यग्भवभयादेव विद्यमानान्येव स्वयमपोहितानि इत्यतः शीतवातादिभिरभिहन्यमानोऽपि णाणी नो परिदेवए, परिदेवणं णाम अहं अचेलो सीएण उण्हेण दंसेहिं वा पीडिज्जामि, जिण्णाणि पोत्ताणि, अतो अण्णाणि भविस्सति, एत्थ उदाहरणं महल्लेति दारं, सोवि अज्जरक्खिअपिता तस्स पुण आदी 'वीयभयं देवदत्ता' 'दट्ठूण चेडिमरणं' 'माया य रुद्दसोमा' 'सीहगिरि भद्दगुत्ते' (९४-९७।९६) चत्तारि गाहाओ जियपडिमाउप्पत्तिं कहेऊणं दसपुरुप्पत्ती अज्जरक्खितपव्वज्जा दिट्ठिवाताधिगमो जाव अज्जरक्खितेण पिया पव्वाविओ जाव चोलपट्टगो कओ,तेणं पुव्वं अचेलगपरीसहो णाधियासिओ, पच्छा अधियासिओ, अचेलगपरीसहो गतो। इदाणिं अरतिपरीसहो'गामाणुगामं रीयंतं'सिलोगो(६२सू०९७)ग्रसते बुद्धयादीन् गुणानिति ग्रामः, ग्रामादन्यत् पथि अनुलोमं वा गच्छतो अनुग्रामः, अगा वृक्षाः तैः कृतमगारं नास्य अगारं विद्यत इत्यनगारः तं पुण अणगारं'अकिंचनं' नास्य किंचनं सोऽयमकिंचनः निष्कांचनो वा,स हि सुखेन रीयति अप्रतिबद्धः गृहवानपि, सकिंचनः दुःखं रीयति, उदाहरणं तच्चन्निकेतओ,आयरियं उद्दिस्स पच्छतो गच्छमाणेण नउलओ दिट्ठो, सो तेण गहितो,भयतः आचार्यं समेत्य ब्रवीति-बिभेमि पच्छतो, पुरतो गच्छामि, उज्झ भयंतीत्युक्तः, पुरतो बीभेति, आयरियसमीपत्थो बिभेमीत्याह, उज्झ भयामिति पुनरप्युक्तः, तस्य धर्म्मसंज्ञा सुज्झिता, दूरतोज्झितः, आचार्येणोक्तः-किमिदानिं न बिभेसि ?, जं तुरंतो ता गच्छसि, सो भणति-उज्झितं मे भयं, इत्येवं अकिंचणो सुहं विहरति। तमेवं परीयंतं यदि नाम अरती अणुपविसेज्ज, पश्चाद्धि अरतीत्यनु, बिभ्रतामिति संजमे अरतिं, तितिक्खे णाम सहमानस्तां परिव्रजेत्, अरतस्य हि नापि धर्मो, नो तद्रंतंपि नरः शक्तो व्यवस्थापयितुं धम्मे इति अतो धम्मविघ्नकारिणीं मत्वा तां ' अरतिं पिट्ठतो किच्चा ' सिलोगो (६३ सू० ९९) पृष्ठतो नाम दूरतः उज्झित्ता, विरतवान्


मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ||६२-६३|| दीप अनुक्रम [६२-६४]

विरतः, विरतस्य हि सतः कुतोऽरतिः संयमे स्यात्, आत्मेवात्मानं रक्षतीत्यात्मरक्षितः, किमभिप्रेतं ?, आत्मसमुत्था दोसा अरतिः, आत्मनि च वैराग्यमस्योत्पन्नं, किं वारतिं प्रयोजयेत्, अरतिः स्यात्कुचरतः तदिदमुच्यते–' धम्मारामे ' अत्यर्थं रमति तस्मिन् इत्यारामः धर्म एवाराम धर्मारामः, श्रुतभावनाद्ध्ययनादिषु, आरंभ्यत इत्यारंभः, आरंभो नास्तीतिकृत्वा, कृत्येष्वारंभवतां रतिर्भवति, ' उवसंते मुणी ' उपेत्य शांतः उपशांतः-प्रशांतः, अकषायवानित्यर्थः, अत्रोदाहरणं तापसेन, तत्थ गाहा— ' अयलपुरे जुवराया ' (९८—९९) अयलपुरं णाम अहिट्ठाणं, तत्थ जियसत्तु राया, तस्स पुत्तो जुवराया, सो राहायरियाण अंतिए पव्वइतो, सो य अण्णया विहरंतो गतो तगरिं णगरिं, तस्स य राहायरियस्स सज्झंतेवासी अज्जराहखमणा णाम उज्जेणीए विहरंती, ततो आगता साहुणो तगरं, गता राहस्समीवं, ते पुच्छिता णिरूवसग्गं, ते भणंति– रायपुत्तो पुरोहियपुत्तो य बाहेंति, तस्स जुवरायापव्वतियगस्स सो रायपुत्तो भत्तिज्जतो भवति, मा संसारं भमिहितित्ति आपुच्छिऊण आयरिए गतो उज्जेणिं, भिक्खवेलाए उग्गाहेऊण पट्ठितो, आयरिएहिं भणितो–अच्छाहि, सो भण्णति-ण अच्छामि, णवरं दाएह तं पडिणीतं घरं, चेल्लगो भणितो-वच्च दाएहि, तेण दाइतं, सो तत्थ गतो, वीसत्थो य पविट्ठो, तत्थ ते दोऽवि अच्छंति, ते तं पेच्छिऊण उट्ठिता, तेणवि महासद्देण धम्मलाभियं, ते भणंति-अहो लट्ठं, पव्वइगो अम्हंतेण(आ) गतो, वंदामत्ति, भणंति तेआयरिया ! तुब्भे गायितुं जाणह, तेण भणियं-आमं जाणामो, तुम्हे वाएह, ते आढत्ता, जाव ण जाणंति, तेण भण्णति-एरिसगा चेव तुब्भे कोलिया, ण किंचिवि जाणह, ते रुट्ठा उद्धाइया, तेण घेत्तुं तेसिं णिजुद्धं जाणंतएण सव्वे संघी खोहिता, पढमं ता पिट्ठियता, ते हम्मंता राडिं करेंति, परियणो जाणइ—सो एस पव्वइओ हम्मंतो राडिं करेइ, सोऽवि गतो, पच्छा तेहिं

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [१] गाथा ||६२-६३|| दीप अनुक्रम [६५-६६]




श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ६३ ॥

दिट्ठा, णवि जीवंति, णवि मरंति, णवरिं निरिक्खंति एक्कमेक्कं दिट्ठीए, पच्छा रण्णो सिट्ठं पुरोहितस्स य, जहा इत्थ उ कोइ पव्वइतो, तेण दोवि जणा विसंखलिऊण मुक्का, पच्छा राया सव्वबलेण आगओ, पव्वइतगाण मूलं गतो, सोवि साहू एगपासे अच्छति परियट्टंतो, राया आयरियाणं पादेहिं पडितो, पसायमावज्जह, आयरिएहिं भण्णति-अहं ण याणामि, महाराय ! एत्थ एगो साहू पाहुणगो आगतो, जति परं तेणं होज्जा, राया तस्स मूलं समागतो, पच्चभिण्णातो य, ततो तेण साहुणा भणितो—धिरत्थु ते रायत्तणस्स, जो तुमं अप्पणो पुत्तभंडाणवि णिग्गहं ण करेसि, पच्छा राया भणति- पसायं करेह, भणति—जति परं पव्वयंति दोण्हं मोक्खो, अन्नहा नत्थि, रायणा पुरोहिएण य भण्णति-एवं होउ, पव्वयंतु, पुच्छिया भणंति—पव्वयामो, पुव्वं लोओ कओ, पच्छा मुक्का, पव्वइया, सो य रायपुत्तो णिस्संकिओ चेव धम्मं (कुणति) पुरोहितपुत्तस्स पुण जातिमतो, अम्हे य मड्डाए पव्वाविया, एवं ते दोवि कालं काऊण देवलोगे उववन्ना, इतो य 'कोसंबीए सेट्ठी' गाहा-(९९—९९)कोसंबीए नयरीए तावसो नाम सेट्ठी, सो मरिऊण नियघरे सूयरो जातो, जाईसरो, ततो तस्स चेव दिवसगे पुत्तेहिं मारितो, पच्छा तहिं चेव घरे उरगो जातो, तहिंपि जाइस्सरो जातो, तत्थवि अंतो घरे मा खाहितित्ति मारितो, पच्छा पुणोवि पुत्तस्स पुत्तो जातो, तत्थऽवि जाइं सरमाणो चिंतेइ-कहं अहं अप्पणो सुण्हं अम्मंति वाहरीहामि?, पुत्तं वा तातंति?, पच्छा मूयत्तणं करेति, पच्छा महन्तीभूतो, साधूणं अंतीणो, धम्मोऽणेण सुतो, सावगो जातो, इत्तो य धिज्जाइय देवो महाविदेहे तित्थगरं पुच्छति-किमहं सुलहबोहिओ दुल्लभबोहियत्ति, ततो सामिणा भणिओ-दुल्लभबोहियोऽसि, पुणोवि पुच्छति-कत्थाहं उववज्जिस्सामि?, भगवया भण्णति-कोसंबीए मूयस्स भाया भविस्ससि, सो य मूओ पव्वइस्सति, सो देवो भगवंतं वंदिऊण गतो मूयगस्सगासं, तस्स सुबहुयं दव्व-

अरति परीषहः ॥ ६३ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [१] गाथा ||६२-६३|| दीप अनुक्रम [६५-६६]



श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ६४ ॥

जातं दाऊण भणति-अहं तुब्भ पिउघरे उववज्जिस्सामि, तीसे य डोहलओ अंबएहिं भविस्सति, अमुगे य पव्वते मया अंबगो सदापुप्फफलगो कतो, तुमं तीए पुरओ णामं लिहिज्जासि जहा तुब्भं पुत्तो भविस्सति, जइ तं मम देसि तो ते आणामि अंबफलाणित्ति, ततो ममं जातं संतं तहा करेज्जासि जहा धम्मे संबुज्झामित्ति, तेण पडिवण्णे गतो देवो, अण्णया कयवय-दिवसेसु चइऊण तीए गब्भे उववन्नो, अकाले अंबडोहलो जातो, स मूगो णामगं लिहति, तहेव कहेइ, ताए भण्णति-दिज्जति, तेण आणीताणी अंबफलाणि, विणीतो डोहलो, कालेण दारगो जातो, सो तं खुड्डलयं चेव होंतं साधूण पाएसु पाडेति, सो धाहाओ करेति, ण य वंदति, पच्छा संतपडितंतो मूयगो पव्वइओ, सामन्नं काऊण देवलोगं गतो, तेण ओही पउत्ता, जाव णेण सो दिट्ठो, पच्छा णेण तस्स जलोदरं कतं, जेण ण सक्केति उट्ठेउं, सव्ववेज्जेहिं पच्चक्खातो, सो देवो डोम्बरूवं काऊण घोसंतो हिंडति—अहं वेज्जो सव्ववाही पसमेमि, सो भणति-मम पोट्टं सज्जावेहि, (जइ समं वयसि) तेण भण्णति-चच्चामि, तणे सज्झवितो, गतो तेण सद्धिं, तेण तस्स सत्थगोसगो अल्लवितो, सो ताए देवमायाएऽतीव भारितो, जाव य पव्वतियगा एगंमि पदेसे पढंति, वेज्जेण सो भण्णति-जति पव्वयसि तो तं मुयामि, सो तेण भारेण परितावि़ज्जंतो चिंतेति-वरं मे पव्वइउं, भणति—पव्वयामि, पव्वइतो, देवे गते णाचिरस्स उप्पव्वइतो, तेण देवेण ओहिणा पेच्छिऊण सो चेव से पुणोऽवि वाहि कओ, तेणेव उवाएण पुणोवि पव्वाविओ, एवं एक्कसिं दो तिन्नि वारगाओ पव्वइतो, तइयावाराए गच्छति देवो तेणेव समं, तणभारं गहाय पलियन्तयं गामं पविसति, तेण भण्णति-किं तणभारएण पलित्तं गामं विससि ?, तेण भण्णइ-तुमं कहं कोहमाणमायालोभसंपलितं गिहवासं पविससि?, तहावि ण संबुज्झति, पच्छा पुणोऽवि दोवि जणा गच्छंति, णवरं देवो अडवीए उप्पहेण पट्ठितो, तेण भण्णति-


अरति परीषहः

॥ ६४ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ||६२-६३||

दीप अनुक्रम [६५-६६]



श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ६५ ॥

तुमं कहं मोक्खपदं मोत्तूण संसाराडविं पविससि ?, तहावि ण संबुज्झति, पुणो एगंमि देवकुले वाणमंतरो अच्छि(च्चि)ओ हिट्ठाहुत्तो पडति, अहो वाणमंतरो अधण्णो अपुण्णो य जो उवरिहुत्तो कओच्चिय अतो य हेट्ठाहुत्तो पडिति, तेण देवेण भण्णति-अहो तुमंपि अहन्नो जो पराहुत्तो ठवितो अच्चणिज्जे य ठाणे पुणो पुणो उप्पव्वयसि, तेण भण्णइ-कोऽसि तुमं ?, तेण भूयरूवं दंसियं, पुव्वभवो य से कहितो, सो भण्णति-को पच्चओ जहाऽहं देवो आसी ?, पच्छा सो देवो तं गहाय गतो वेयड्ढं पव्वयं सिद्धाययणकूडं च, तत्थ तेण पुव्वं चेव संगारो कहिओ, जहा जति जहं ण संबुज्झेज्जा तो एयं भमचयं कुंडलजुयलं सनामंकियं सिद्धाययणपुक्खरणीए दरिसिज्जासि, तेण से तं दंसियं, सो तं कुंडलं सनामंकं पेच्छिऊण जातिस्सरो जातो, संबुद्धो पव्वइतो, संजमे य से रती जाता, पुव्वं अरती आसी, पच्छा रती जाता, अरतिपरीसहो गतो। इदाणिं इत्थिपरीसहो, स्यादिक-समुत्था अरतिः ?, उच्यते, स्त्रीसमुत्था, 'संगो एस मणुस्साणं' सिलोगो (६४ सू० १०३) सज्यते इति संगः, एष इति प्रत्यक्षीकरणे, एष एव सर्वसंगानां संग इति, कश्चासौ ?, 'जाउ लोगंसि इत्थितो' जा इति अनिर्दिष्टस्य निर्देशे, लोगो तिविहो— उड्ढलोगो अहोलोगो तिरियलोगो, अस्मिन् लोगे इत्थिओ तिरिक्खजोणीओ मणुस्सीओ देवीओ, जस्सेया परिण्णाता नाभ लहुसियाए "एता हसंति च रुदंति च अर्थहेतोर्विश्वासयंति च परं न च विश्वसंति । तस्माच्चरेण कुलशीलसमन्वितेन, नार्यः स्मशानसुमना इव वर्जनीयाः ॥१॥" "इति, समुद्रवीचीचपलस्वभावाः, संध्याभ्ररेखा व मुहूर्तरागाः। स्त्रियः कृतार्थाः पुरुषं निरर्थकं, निपीडितालक्तकवत् त्यजंति ॥२॥" एवं जाणणपरिण्णाए परिजाणिऊण चत्ता पच्चक्खाणपरिण्णाए इत्यतो जस्सेता परिण्णाता, उभयथावि परिण्णाता, 'सुकडं' सुक्खं क्रियत इति सुकडं, सुट्ठु वा कयं सुकडं, निट्ठार्थग्रहणं परिजाणिऊण

स्त्री परीषहः


॥ ६५ ॥

श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ६६ ॥

सव्वसंगपरिमुक्कस्स, किं च समणत्तणस्स दुक्करं?, समणभावं सामण्णं ॥ ' एवमादाय मेधावी ' सिलोगो, (६५ सू० १०६) एवमनेन प्रकारेण एवमाज्ञाय-एवमुवलभ्येत्यर्थः, पठ्यते च-'एवमाधाय मेधावी' एतत्परिज्ञानमादायेति जहा एया लहुस्सिगा इत्यादि, पंकेण तुल्या पंकभूता जहा पंके णिमज्जंते मच्छंते, एवमेतासु बालिशाः सक्ताः संसारपंके णिमज्जंते, 'णो ताहिं विनिहन्निज्जा चरेज्जत्तगवेसए, घातो नाम तासु अभिस्संगो तन्निमित्तो वा धम्मपरिच्चागो, चरे इति अनुमतार्थे, आत्मानं गवेसयतेत्ति अत्तगवेसए, कथं ते आत्मा न संसारायेति, कथं वा मे चरित्रात्मा तामिर्न हन्येत इति ॥ अत्रोदाहरणं-'पडिमाए मूलभवो वत्त ' गाहा ' उसभपुरं ' पंच गाहाओ (१०० । १०४—१०६) भाणियव्वाओ, एतं च अक्खाणयं, जक्खाए० थूलभद्दो गणियाघरे वुच्छो, सेसा तिन्नि साधू. एगो सप्पबिलसहीए एगो वग्घबिलसहीए एगो कूवतडे, जाव कंबलरयणं चंदणियाए छूढं, जहा थूलभद्देण अहियासियं तहा अहियासेयव्वं, ण जहा तेण साहुणा न अधियासियं तहा णाहियासेयव्वंति इत्थिपरीसहो गतो । इदाणिं चरियापरीसहो ' एग एव ' सिलोगो (६६सू० १०७) एगो णाम रागद्दोसरहितो, अहवा एगो 'जणमज्झेवि वसंतो' गाहा ( ) एगे पुण पढंति ' एग एगो चरे लाढे ' एगो नाम असहायवान्, एगत्थविहारी, बितियमेकग्रहणं अरागद्वेषवान्, चरेदित्यनुमतार्थे, लाढे इति फासुएण उग्गमादिसुद्धेण लाढेति, साधुगुणेहिं वा लाढय इति ज्ञापयतेति, अभिमुखं भूत्वा सोढवान्, न तैरभिभूत इत्यर्थः, कुत्र चरेत्?, किमरण्ये ?, नेत्युच्यते-' गामे वा नगरे वा ' ग्रसति बुद्धयादीन् ग्राम इति, नात्र करो विद्यते इति नगरं, नयन्तीति निगमास्त एव नैगमाः, नानाकर्मशिल्पजातय इत्यर्थः, ते यत्र संति तं निगमं, राज्ञः धानी राजधानी, स्याद् बुद्धिः — किमरण्ये न वसतीति?, उच्यते, लोकायत्ता हि तस्य प्रासुकाहारवृत्तिः,

स्त्री परीषहः

॥ ६६ ॥



श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ६७ ॥

तेन जनपदे वसति, तत्रापि वासो वसन् ' असमानो चरे भिक्खू ' सिलोगो (६७सू० १०७) असमान इति असमादि(नि)कः, असंनिहित इत्यर्थः, यथा असमानिकत्वात् गृहवान्, तस्स बद्धमणी ण वहति, एवं सोऽपि जत्थ वसति तत्थ ण सडितस्स पडियस्स वा उदंतं वहइ, अहवा असमाण इति नो गृहितुल्यितः, न हि तदुदंतप्रवृत्ता मूर्छिताश्चास्मिन्, अथवा असमानः अतुल्यविहारः, अन्यतीर्थिकैः, परिग्रहो नामो उवस्सगस्सेव तदुपकारिणं वा कोपादीनां धनधान्यस्य वा, मूर्छा परिग्रह इतिकृत्वा, यैः सह वसति तैः ग्राम्यैर्नगरैः प्रातिवेशकैः वा, तेसिं 'णेव कुज्जा परिग्गहं' ममीकारमित्यर्थः, ग्रामादिष्वपि च वसन् नासन्ने, गृहादीनामारामोद्यानादिषु 'असंसत्तो गिहत्थेहिं' असंसत्तो असंसक्त इत्यर्थः, गृहे लिष्ठतिर, कथंचिन्नाम आसन्नोपि वसन् तैर्न भावतः संसज्जेत, निकेतं–गृहं, नास्ति निकेतनमस्येत्यनिकेतः अणियतवासो वा, अत्रोदाहरणं सीसे(ण)हिंडगेण, तत्थ गाहा, ' कोल्लयरे ' गाहा (१०६—१०७) कोल्लयरे वत्थव्वो संगमथेरो आयरिओ, जंघाबलपरिहीणो, दुब्भिक्खे न हिंडतो, तस्स सीसो आहिंडको दत्तो नाम, जहा पिंडनिज्जुत्तीए तहा वाच्यं, एत्थ य तस्सायरियस्स णववसहिभागिस्स जयणाजुत्तस्स अच्छंतस्सवि एक्कहिं भावचरिया एव, जेण जुट्ठो, दत्तस्स पुण दव्वचरिया अविसुद्धा, जेण न जुट्ठो, चरियापरीसहो गतो, इदाणिं निसिहियापरीसहो, तप्पडिवक्खेण णिसीहियत्ति वा ठाणंति वा एगट्ठं, तं तु तस्स साधोः कुत्र स्थाने स्यात्?, णिसीहियमित्यर्थः?, 'सुसाणे सुन्नगारे वा' सिलोगो (६८ सू० १०८) सुसाणं सुन्नागारं, रुक्खस्स आसन्नं रुक्खमूले, एतागी—असहायगो रागद्दोसविरहिओ वा, अकुक्कुओ निसीएज्जा, विविधं त्रासनं वित्रासनं। 'तत्थ से अच्छमाणस्स' सिलोगो (६९ सू० १०९) तत्थित्ति तस्मिन् सुसाणादिषु, उपसज्यंत इत्युपसर्गाः, विविधाः समस्ताः प्रत्येकं सोढा, अभिधारणा नाम

स्त्री परीषहः

॥ ६७ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ||७०-७१||

दीप अनुक्रम [७१-७२]

प्रार्थना, अभिमुखं वा धारयंतीति अभिधारणा, केचित्तु पठंति-'उवसग्गभयं भवे' स तैः प्रार्थ्यमानो वज्झमाणो वा संकातीतो ण गच्छेज्जा, संका अण्णाणतो देवं पेच्छेज्जा भावसंका सा घेप्पति, ताए संकाए भीतो ण गच्छेज्जा, अत्रासंका, भापनीत्यर्थः, भयं, आसंकितं वा भयं, किमत्र भयं स्यात् ?, न बिभेति, भयं तु प्रत्युत्पन्नमेव येनाभिद्रुतः स्यात्, पलायति वा विक्रोशति वा, एवं गामेवि हितोत्पत्तौ अणुपविसति, एत्थोदाहरणं— 'अगणि' त्ति, तत्थ गाहा—'णिक्खंतो गयपुरातो' गाहा (१०७—१०९) कुरुदत्ततो णाम इब्भपुत्तो, तहारूवाणं थेराणं अंतीए पव्वइतो, सो कयाए एगल्लविहारपडिमं पडिवन्नो, साएतस्स णगरस्स अदूरसामन्ते पोरसी ओगाढा, तत्थेव पडिमं ठितो चचरे, ततो एक्काओ गामाओ गावीओ हिरिज्जंतिओ तेणोगासेण णीताओ. कुडिया मग्गमाणा यागता पेक्खंता पदेण जाव साधू दिट्ठो, तत्थ दुवे पंथा, पच्छा ते ण तेण जाणंति-कतरेण पंथेण णीतातो?, ते साहू पुच्छंति-कयरेण पहेण गावीतो णीतातो ?, सो भगवं न वाहरति, तेहिं रुट्ठेहिं ण वाहरतीतिकाऊण तस्स सीसे मट्टियाए पालिं बंधिऊण चितआओ अंगारा घेत्तूण सीसे छूढा गया य, सोऽवि भगवं संमं सहति, तेण णिसीहियापरीसहो अहियासिओ, निसीहियापरीसहो गतो, इदाणिं सेज्जापरीसहो 'उच्चावयाहिं' सिलोगो (७० सू० ११०) उच्चा अवचाश्च, उद्धंचिता उच्चा, उपाचिता गुणैः उच्चत्तेण वा, अथानेकप्रकारासु उच्चावयासु शेते तस्यामिति शय्या भिक्खु थामवं णातिवेलं विहण्णिज्जा, वेला सीमा सेतुर्मर्यादेत्यनर्थान्तरं, अतिवेलं विहण्णेज्जा, विविधं हन्यते विहन्यते, विघातो णाम जेण संजमजीवियाओ हन्यते, उच्चाए अहो इमा शीतला उतुक्खमा, अवचाए अहो इमा पावा सेज्जा अकृतुक्खमा, एवं पावदिट्ठि विहण्णति, पापदृष्टिः, अभियोगमित्र मन्यते, वारसमालंबा जति महो जस्सेसा पवाता वा

॥ ६८ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ||७०-७१||

दीप अनुक्रम [७१-७२]

णिवाता वा पतिरिक्का वा, एवं अवचितासु, उच्चासु त अहो मे मणुन्ना सेज्जा, एवं पावदिट्ठि विहण्णति । स एवं अपापदिट्ठी " पयरीक्कुवसयं णच्चा ' सिलोगो (७१सू०११०) पयरेक्को णाम पुण्णो, अव्वाबाहो वा असु(ब्भु)ण्णवो वा, ण किंचिवि तत्थ ठविया, जं निमित्तं तत्थागच्छिस्संति, अयं ऋतुखमितो, ण कप्पडियादिहिं य उवभुज्जति, कल्यतामानयतीति कल्याणः, पापको नाम पांसु कूरे वा अरितुक्खमो वा पापकः, पइरिक्कोऽपि वसन्-'किं मज्झ एगरातीए? ' किमिति परिप्रश्ने, किमेकरात्र्यां भविष्यति, सो हि एगल्लविहारी गामे एगरातीए णगरे पंचरातीए, रमणीए तावत् अद्यैवायं रमणीयः उपाश्रयः, हिज्जो अन्नो भवति सोभणो असोभणो वा,पापकोऽपि अद्यैवायं ममाशोभनो,हिज्जो अन्नो भविस्सति,यत्रापि चिरं वसति तत्राप्यालंबते 'किं मज्झ एगरायाए' किमियं एगरात्री देरात्री भविष्यति, बद्धोऽपि एकरात्रं लंघयति, एवं आलम्बनं कृत्वा एवं तत्थऽधियासए, अत्रोदाहरणं 'णिव्वेगं', तत्थ गाहा— ' कोसंबि जण्णदत्तो ' गाहा (१०८—१११) कोसंबी णयरी, जण्णदत्तो धिज्जातितो, तस्स दो पुत्ता-सोमदत्तो सोमदेवो य, ते दोवि निव्विन्नकामभोगा पव्वइया, सोमभूतिस्स अणगारस्स अंतीए, बहुसुता बहुआगमा य जाता, ते अन्नया सन्नातयपल्लिमागता, ते य तेसिं मातापितरो उज्जेणिं गतिच्छिया, तेहिं पवसिए हिज्जाइगिणिओ वियडं आवियंति, ताहे तेसिं वियडं अण्णदव्वेण मेलेऊण दिन्नं, केई भणंति- वियडं चेव अयाणंतीए दिन्नं, तेहिं-वियं तं विसेसं अयाणमाणेहिं पीयं, पच्छा वियडत्ता जाया, ते चिंतंति-अम्हेहिं अजुत्तं कतं,पमाओ एस, वरं भत्तं पच्चक्खायंति ते एगाए णदीए तीरे कट्ठाण उवरिं पाओवगया, तत्थ अकाले वरिसं पडियं, पूरो य आगतो, हरिता वुज्झमाणा य उदएण समुद्दं णीया, तेहिं सम्मं अहियासियं, अहाउयं पालियं, सेज्जापरीसहो अहियासिओ समविसमाहिं सेज्जाहिं, एवं सेज्जापरी-

॥ ६९ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ||७२-७३||

दीप अनुक्रम [७३-७४]

सहो गतो। इदाणिं अक्कोसपरीसहो 'अक्कोसेज्ज परो भिक्खू' सिलोगो (७२सू०१११) आक्रुस्यते यतस्स आक्रोशः- अनिष्टाभिधानं, परे णामाधमो बहिरात्मानं व्यवस्थाप्य भिक्षणशीलो भिक्षुः एतेसिं अक्कोसंताणं पडिसंजले, प्रति संजलतीति प्रति संजलेत्ति,समस्तं वा जलति संजलति, इंधणे वा अग्गी, संजलियलक्खणं तु पडिअक्कोसंति आहणंति वा, जो एवं पडिसंजलति सो सरिसो होइ बालाणं, जो पडिअक्कोसेति आहणति वा, अत्रोदाहरणं— देवता उवसंता, सा अभिक्खणं वंदिता एति, वदइ य-मम कज्जमाणेज्जासि, सो एएण धिज्जातीएण सह असंखडं लग्गो, सो तेण बलवंतेण खामसरीरो पाडितो तालिओ य, रत्तिं देवता तं वंदिया आगता, वंदति, खमगो तुसिणीतो अच्छति, सा भणइ-कोइ मम अवराधो ?, सो भणति- तुमे ण किं तस्स धिज्जातियस्स कतं ?, सा भणति-अहं तत्थ विसेसं चेव ण याणामि-को धिज्जाइओ खमगो वत्ति, दोऽवि तुल्ला तुज्झे, सम्मं पडिचोयणात्ति पडिवन्नं, इत्यतः सरिसो होइ बालाणं, तत्थ ण पडिसंजले, यतश्चैवं ' सोच्चाणं फरुसा भासा ' सिलोगो (७३ सू० ११२) फरुसा निःस्नेहा अनुपचारा, श्रमणको निल्लज्जा इत्यादि, मणं दारयतीति दारुणा, ग्रसत इति ग्रामः-इंद्रिय-ग्रामः तस्य इंद्रिग्रामस्य कंटगा, जहा पंथे गच्छंताणं कंटगा विग्घाय, तहा सद्दादयोवि इंद्रियग्रामकंटया मोक्षिणां विग्घायेति, ताणेव कंटकान् तुसिणीओ उवेहेज्जा, उपेक्षा नामैतेस्वनादरः, मनःकरणं नाम तदुपयोगः, मनसोऽसमाधिरित्यर्थः, एत्थ अज्जुण उदाहरणं, मोग्गरेत्ति दारं। तत्थ गाहा— 'रायगिह मालगारो' गाहा— (११०—११२) रायगिहे णगरे अज्जुणओ नाम मालागारो परिवसति, तस्स भज्जा खंदसिरी णामा, तस्स रायगिहस्स नगरस्स बहिया मोग्गरपाणी णाम अज्जुणकस्स कुलदेवतं, तस्स य मालागारस्स आरामपंथे चेव जक्खो, अण्णदा खंदसिरी भत्तं तस्स भत्तारस्स णेतुं गता, अग्गाइं पुप्फाइं

श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ७१ ॥

घरे घेतुं गच्छति, मोग्गरपाणी घरए य विभाए वूढा, सा ताए गोट्ठीए छहिं जणेहिं दिट्ठा, चिंतेति-एसा अज्जुणगस्स भज्जा पडिरूवा गिण्हा मो णं. तेहिं सावि गहिया, छवि जणा तस्स जक्खस्स पुरतो भोगे भुंजंति, सो हि मालागारो निच्चकालमेव अग्गेहिं वरेहिं पुप्फेहिं जक्खं अच्चेति, अच्चिउकामो सो ततो आगच्छति, ताए ते भणिता—एसो मालागारो आगच्छति, तुब्भे मए किं विसज्जेह ?, तेहिं णातं-एताए पियं,तेहिं भणियं-एतं मालागारं बंधामो, तहिं सो बंद्धो अवउडएण, जक्खस्स पुरतो ठवेऊण पुरतो चेव से भारियं भुंजंति, सावि तस्स भत्तारस्स मोहुप्पाइयाइं इत्थिसद्दाइं करेति, सो मालागारो चिंतेति-एयं अहं जक्खं निच्चकालमेव अग्गेहिं वरेहिं उतुगेहिं पुप्फेहिं अच्चेमि तहावि अहं एतस्स पुरतो चेव एवं कीरामि, जति एत्थ कोइ जक्खो होंतो तो अहं ण कीरिंतो एवं, सुव्वत्तं एतं कट्ठं, णत्थि कोई मोग्गरपाणी। ताहे सो जक्खो अणुकंपंतो मालागारस्स सरीरमणुपविट्ठो, तडयडस्स बंधाण छित्तूण लोहमयं पलसहस्सनिप्फन्नं मोग्गरं गहाय अण्णाइट्ठो समाणो तत्थ छप्पित्थिसत्तमे पुरिसे घातेति, एवं दिणे दिणे इत्थिसत्तमे छ पुरिसे घातेमाणो विहरति, जणवतोवि रायगिहाओ णगराओ ताव ण णिग्गच्छति जाव न सत्त घातिता। तेणं कालेण तेणं समएणं समणे भगवं महावीरे समोसरति जाव सुदंसणो सेट्ठी वंदओ णीति, अज्जुणएण दिट्ठो, सागारपडिमं ठितो, ण तरति अतिक्कमेउं, परिपेरंतेहिं भमेत्ता परिसंतो अज्जुणओ, सुदंसणं अणिमिसाए दिट्ठीए पलोएति, जक्खो य मोग्गरं गहाय पडिगतो, पडिओ अज्जुणगो, उट्ठितो य तं पुच्छति-कहिं गच्छासि ?, भणति-सामिवंदओ, धम्मं सोच्चा पव्वइतो, रायगिहे य भिक्खं हिंडंतो सयणमारगोत्ति लोगेण अक्कुसति णाणापगारेहिं, सो सम्मं सहति खमति, सम्मं सहंतस्स केवलनाणं उप्पन्नं, एवं अक्कोसपरीसहो गतो। इदाणिं वधपरीसहो—'हतो ण

आक्रोश परीषहः

॥ ७१ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ||७४-७५|| दीप अनुक्रम [७५-७६]

संजले भिक्खू ' सिलोगो (७४ सू० ११४) हन्यते स्म हतः, संजलनं नाम रोषोद्गमो मानोदयो वा, संजलितलक्षणं " कं पति रोषादग्निः संधुक्षितवच्च दीप्यतेऽनेन । तं प्रत्याक्रोशत्याहंति च मन्येत येन स मतः ॥ १ ॥ " मणंपि न पदोसए, किमु प्रत्याहणणं?, अथवा मनःप्रदोषा एव कायेन प्रत्युद्गच्छत्याक्रोशति वा, स्यात्-किमालंबनं कृत्वा न पडिसंज्वलेदिति ?, उच्यते, 'तितिक्खं परमं णच्चा' तितिक्खणं सहणमित्यर्थः,परं मानं परमं, नातः परं निर्जराद्वारमस्ति, भिक्खुधम्मं विचिंतए, इमातो य आलंबणातो सहियव्वं ' समणं संजयं दट्ठूं ' सिलोगो (७५ सू० ११४) समो सव्वत्थ मणो जस्स भवति स समणो, सम्मं जतो संजतो-हस्तपादातिसंजतो, को णाम दुज्जणो से दोषोपहतात्मानं हन्यात् जाहम्ममाणोवि, स एव हत्थपायाइसंजओ, ण पच्छा सूरयतीति, दुज्जणा हि पच्छा सूरणभयादेव ण परं वावाययंति, उक्तं हि— " अविनयमनसो हि दुर्जनः, क्षमिणि जनेऽप्यधिकं हि वर्त्तते । जनमिह तु समेत्यकर्कशः, परिशुद्धेर्वाऽश्मनि न प्रवर्त्तते ॥ १ ॥ कोऽपीति कश्चिद्बालः, कत्थविचि गामे नगरे वा उवस्सए वा, तत्थालंबणं ' अक्कोसहणणमारणधम्मब्भंसाण बालसुलभाणं । लाभं मन्नति धीरो जहुत्तराणं अभावंमि ॥ १ ॥ अक्कोसति कोति विद्यते एवं बालेसु, अयं तु लाभो-जं मे ण ताडेति, ताडेंति जं मे ण मारेंति, मारेंति जं मे धम्मातो ण भंसेइ, नित्यत्वात् अमूर्तत्वाच्च न शक्नोति जीवं नाशयितुं, एवं 'णत्थि जीवस्स णासे' त्ति णाऊण 'ण ता पेहे असाधुवं' ति, साधू हि सति सत्तीए न प्रत्युद्गमनायोपीतष्ठति, असत्तो पुण जो न मणसा संकिलिस्सति, अथवा 'ण य पेहे असाधुत्वं' असाधुभावो असाधुता, पठ्यते च 'णत्थि जीवस्स णासोत्ति एवं पीहेज्ज संजए'पीहेज्ज-चिंतेज्जा,एत्थ उदाहरणं वणेत्ति दारं, तत्थ गाहा— ' सावत्थी जियसत्तु' गाहा ' सुणिसुव्वयंतेवासी ' गाहा 'पंच सया जंतेण गाहा

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ||७४-७५||

दीप अनुक्रम [७५-७६]

श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ७३ ॥

(१११। ११३–११५) सावत्थीनयरीए जियसत्तू राया, धारिणी देवी, तीसे पुत्तो खंदओ नाम कुमारो, तस्स भगिणी पुरंदरजसा, कुंभकारे णगरे दंडी णाम राया, तस्स दिन्ना, तस्स य दंडगिस्स रण्णो पालगो नाम पुरोहितो, अण्णदा सावत्थीए मुणिसुव्वयसामी तित्थंकरो समोसरितो, परिसा निग्गता, खंदओऽवि णिग्गतो, धम्मं सुच्चा सावगो जातो, अन्नया सो पालकमरुओ दूयत्ताए आगतो सावत्थिं नगरिं, अत्थाणिमज्झे साधूण अवण्णं वयमाणो खंदएण णिप्पिट्ठपसिणवागरणो कतो पदोसमावण्णो, तप्पभिइं चेव खंदगस्स छिद्दाणि चारगपुरिसेहिं मग्गावेंतो विहरति, जाव खंदओ पंचजणसएहिं कुमारोलग्गएहिं सद्धिं मुणिसुव्वयसामिसगासे पव्वतितो, बहुस्सुतो जातो, तहेव सो पंच सताणि सीसत्ताए अणुण्णाताणि, अण्णया खंदओ सामिं पुच्छति-वच्चामि भगिणिसयासं, सामिणा भणियं-उवसग्गो मारणंतिओ, भणति-आराहगा विराहगा वा ?, सामिणा भणियं-सव्वे आराधगा तुमं मोत्तुं, सो भणति—लद्धं जति एत्तिया आराधगा, गतो कुंभकारकडं, मरुएण जहिं उज्जाणे ठितो तहिं आयुहाणि सूणूमिताणि, राया वुग्गाहितो, जहा कुमारो परीसहपराइतो एतेण उवातेण तुमं मारेत्ता रज्जं गिण्हिहिति, जइ विपच्चइओ उज्जाणं पलोएहि, आयुधाणि ओलइताणि दिट्ठाणि, ते बंधिऊण तस्स चेव पुरोहितस्स समप्पिता, तेणं सव्वे पुरिसजंतेण पीलिता, तेहिं सम्मं अहियासियं, तेसिं केवलनाणमुप्पण्णं, सिद्धा य, खंदोऽवि पासए धरिओ लोहितचिरिकाहिं भरिज्जंतो सव्वपच्छा पीलिओ,णिदाणं काऊण अग्गिकुमारेहिं उववन्नो,जंपि से रजोहरणं रुधिरलित्तं पुरिसहत्थउत्तिकाउं गिद्धेहिं(गहियं) पुरंदरजसाए पुरतो पाडितं, सावि तद्दिवसं अधितिं करेति, जहा-साधू ण दीसंति, तं च णाए दिट्ठं, पच्चभिन्नातो कंबलओ, णिसिज्जाओ तीए चेव दिन्नाओ, तीए नायं, जहा ते मारिया, ताए खिंसितो राया-पावा विणट्ठोसि, ताए चिंतियं- पव्वज्जामि, देवेहिं

यांचा परीषहः

॥ ७३ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [१] गाथा ||७४-७५|| दीप अनुक्रम [७५-७६]

श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ७४ ॥

मुणिसुव्वयसामीसगासं णीता, तेण देवेण णगरं दड्ढं, सजणवओ,अज्जवि डंडगारण्णं भण्णति,अरण्णस्स य वणक्खा भवति, एत्थ तेहिं साधूहिं वधपरीसहो अहियासिओ, एवं सम्मं अहियासितव्वं,ण जहा खंदएण णाधियासियं,वधपरीसहो गतो।इदाणिं जायणापरीसहो-'दुक्करं खलु भो निच्चं'सिलोगो(७६सू.११६)दुक्करं(क्खं)कज्जातीत्ति दुक्करं,खलु विसेसणे,किं विसेसेति?,दुक्खं हि णिरुपकरिणा सता प्रतिदिवसं हि पिंडार्थं परः प्रणयितुं, भो इत्यामंत्रणे, णिच्चं नियतं कालं, आहारायत्तत्वात् प्राणीनां, यावज्जीवमित्यर्थः, नास्य अगारं विद्यते अनगारः, भिक्खणसीलो भिक्खु, अण्णेवि अणगाराः संति मृगचरोइंडिगाद्याः तद्व्युदासार्थं भिक्षुग्रहणं, तत्रापि च ये भिक्षवः शाक्यादयः(ते)अफासुगाहारत्वात् उदकादिस्वयंग्रहात् द्रव्यभिक्षवः,भावभिक्षुस्तु उद्गमउप्पायणेसणासुद्धं भिक्षणशीलत्वाद् भिक्षुः अतस्तस्य भिक्षोः'सव्वं से जाइयं होइ'सव्वंति-आहारोपकरणसेज्जादि अथवा अस्य शरीरोपकरणत्वात् दंतशोधनाद्यपि, अदत्तं कल्पनीयं, न प्रतिषेधे, अपरिग्रहस्यापि अदत्तादानाविरतेश्च, नास्ति किंचिदयाचितं ॥ 'गोयरग्गपविट्ठस्स' सिलोगो (७७-सू. ११६) गोरिव चरणं गोयरो, जह सो वच्छतो सद्दादिविसयसंपउत्ताएवित्थीए अमुच्छिओ, एवं साधूवि गोयरस्स अग्गं गोयरग्गं, अग्गं पहाणं, जतो एसणाजुत्तं, ण जहा चरगादीणं परिक्खे तोसलिणं, आगतो गोयरपविट्ठस्स पाणी णो सुप्पसारए पातेति पिबति वा तेणेति पाणी, णो सुप्पसारए जहा मम देहित्ति, अवि य-'धणवइसमोऽवि दो अक्खराइं लज्जं भयं च मोत्तूणं। देहित्ति जाव ण भणति पडइ मुहे नो परिभवस्स ॥ १ ॥ स एवं तेण जायणापरीसहेण तज्जिओ 'सेओ आगारवासे'त्ति श्रयंति तमिति श्रेयः, सेयो आगारवासो, यत्र हि अयाचितमेव उदकादि, यत्र वा वेदादिकर्मभिः स्वयमुपार्ज्य मृतबान्धवैश्च पूर्वकमुपनीतं साधुजनदीनानाथकृतसंविभागैर्भुज्यते, एवं चिंतए भिक्खू न, एत्थ रामेण उदाहरणं, तत्थ गाहा- 'जायणपरीसहं' गाहा

यांचा परीषहः ॥ ७४ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ॥७६-७९॥


दीप अनुक्रम [७७-८०]

श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ७५ ॥

(११३॥-११७) सो सिद्धत्थेण देवेण बोधितो तदा कण्हवासुदेवस्स सरीरगं सक्कारेऊणं कयसामाइओ लिंगं पडिवज्जिउं तुंगीसिहरे तवं तप्पमाणो, माणेण कहं भिच्चाण भिक्खट्ठाए अल्लिस्सान्ति तेण कट्ठहाराईण भिक्खं गिण्हइ, न गामं नयरं वा अल्लियइ, तेण णाहियासिओ **जायणापरीसहो,अन्ने** भणंति-बलदेवस्स भिक्खं हिंडंतस्स बहुजणो रूवेण उम्मत्तसमो, ता ण किंचि अण्णं जाणति, तच्चित्ताए अच्छति, तेण सो ण हिंडति, **एस जायणापरीसहो** ॥ इयाणि **अलाभपरिसहो** 'परेसु घासमेसेज्ज' सिलोगो, (७८सू.११७) परे णाम असंयता पापकर्माणो, ग्रस्यत इति ग्रासः-आहारोवकरणं च, भुज्जत इति भोयणं,परिणिट्ठियं-फासुगीकृतं, तं च अप्पणो अट्ठाए,तम्मि सुलद्धे पिण्डे अलद्धे वा अनुगतःतापःअनुतापःअथवा अंतःतप्तं पश्चाद् घटित्वेति तप्यति-अहो मया न लब्धमित्यनुतापः, स्याद् बुद्धिः-अलब्भे ताव तप्यते, लब्धे कथं तप्यते?, उच्यते, अल्पे वा लब्धे, संजत एव, संजतेन निरुपकारिणा को नाम दद्यात्, तदालंबनं तु 'अज्जेवाहं ण लब्भामि' सिलोगो. (७९सू.११७) अस्मिन्नहनि अद्यैव, किं?, मया न लब्धं,यद्यपि तथाविलाभः श्वो भविष्यति, परस्वके सिया, अथवा किमभिप्रेतं?, गुरो! यदि मयोद्घाटं न लब्धं स्थाप्यो निर्जरालाभस्तु मया लब्ध एव अणेसणादि परिहरता, 'जो एवं पडिसंविक्खे'य एवं प्रति संप्रतिष्ठति रिपोरिवोदीर्णस्य तमलाभकस्स परीसहो तं न तज्जति, यस्तु दैन्यं गत्वा परिदेवति स तेनालाभकपरीसहेणाभिभूयते, लोइयमुदाहरणं–वसुदेवसच्चगदारुगा आसावाहिगा अडवीए निग्गोहपादवस्स अधे रत्तिं वासो गता, जामग्गहणं, दारुगस्स पढमो जामो, कोधो पिसायरूवं काऊण आगतो, दारुगं भणति-आहारपत्थी इहमागतो एते पासुत्ते भक्खयामि, जुद्धं वा देहि, दारुगेण भणितं-बाढं, तेण सह संपलग्गो, दारुगो य तं पिसायं जहा ण सक्केति णिहणिउं तहा तहा रूसइ, जहा जहा रूसइ तहा तहा सो कोहो वड्ढति, एवं सो दारुगो किच्छपाणो तं जामं णि-

अलाभ-परीषहः

॥ ७५ ॥




श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ७६ ॥

व्वाहेति, पच्छा सच्चगं उट्ठवेति, सच्चगोवि तहेव तेण पिसाएण किच्छप्पाणो कतो, ततीए जामे बलदेवं उट्ठवेति,(चउत्थे वासुदेवं उट्ठवेति) वासुदेवो (बलदेवो वासु) देवोऽवि तेण पिसाएण तहेव भण्णति, वासुदेवो भणति-ममं अणिज्जितुं कहं सहाए खाहिसि?, जुद्धं लग्गो, जहा जहा जुज्झते पिसाते तहा तहा वासुदेवो आह-अतिवतसंपन्नो अयं मल्लो इति तुस्सते. तहा तहा पिसाओ परीहियति,सो तेण एवं खतितो जेण घित्तुं उवाट्ठियाए छूढो, पभाते पस्सते तिन्निवि ते भिन्नजाणुकोप्परे, केणंति पुट्ठा भणंति-पिसाएण, वासुदेवो भणति-से एस कोऽवि पिसायरूवधारी मया पसंतयाए जितो, उवट्ठियाओ णीणेऊण दरिसितो, एस अलाभपरीस्सहो गतो, जेण जेतव्वो एत्थ सुयगमुदाहरणं पुरेति, पुराणिबद्धस्स तत्थ गाहापच्छद्धं ' किसिपारासरढंढो अलाभए होइ आहरणं (११४-११८) एगंमि गामे पारासरो णाम, तम्मि य अन्नेवि पारासरा अत्थि, सो पुण किसो तेण किसीपारासरो से णामं, अहवा किसीए कुसलो तेण किसीपारासरो, सो तंमि गामे आगत्तियं राउलियं चारिं वाहावेति, ते य गोणादी दिवसं छातेल्लया भत्तवेलं पडिच्छंति, पच्छा ते भत्तेऽवि आणीते मोएउकामे भणति-एक्केक्कं हलयं देह तो पच्छा भुंजहा, तेहिंवि छहिं हलसएहिं वाहिता, तेण तहिं बहुयं अंतराइयं बद्धं, मरिऊणं सो संसारं भमिऊणं अण्णेण सुकयविसेसेण वासुदेवस्स पुत्तो जातो ढंढो नाम, अरहतो अरिट्ठनेमिसामीसगासे पव्वइतो, तं अंतराइयं कम्मं उदिन्नं, फीताए बारवतीए हिंडंतो न लब्भइ कहिंचि, जदावि लब्भति तयावि जं वा तं वा, तेण सामी पुच्छितो, तेहिं कहितं-जहावत्तं, पच्छा तेण अभिग्गहो गहितो, जहा मे परस्स लाभो न गिण्हियव्वो, अण्णया वासुदेवो पुच्छति तित्थगरं—एतासिं अट्ठारसण्हं समणसाहस्सीणं को दुक्करकारओ?, तेहिं भणितं-जहा ढंढो अणगारो, अलाभकपरीसहो कहितो, सो कहिं?, सामी भणति—णगरिं पविसंतो पिच्छिहिसि, दिट्ठो पविसंतेण, हत्थिखंधाउ उत्तरिऊण वंदितो,

: रोग परीषहः

॥ ७६ ॥



श्रीउत्तरा० चूर्णौ २ परीषहाध्ययने ॥ ७७ ॥

सो एक्केण इब्भेण दिट्ठो, जहा महप्पा एसु जो वासुदेवेण वंदितो, सो य तं चेव घरं पविट्ठो, तेण परमाए सड्ढाए मोयगेहिं पडिलाभितो, भमिऊण सामिस्स दावेति, पुच्छइ य–मम अलाभपरीसहो खीणो?,सामिणा भण्णति-ण खीणो, एस वासुदेवस्स लाभो, तेण परलाभं न उवजीवामित्तिकाउं अमुच्छितस्स परिट्ठावेंतस्स केवलनाणं उप्पन्नं, अधियासेतव्वो अलाभपरीसहो जहा ढंढेण अणगारेण ॥ इदाणिं रोगपरीसहो—' णच्चा उप्पतितं दुक्खं ' सिलोगो (८० सू० ११९) उत्पत्तिअं रोगं दुक्खं वा, स तु रोगो वातिकः पैत्तिकः श्लेष्मजश्चेति, वेद्यंत इति वेदनाः ताभिर्वेदनाभिः आर्तीकृतः वेदनादुहट्टितो ' अदीणो ' न दीयते स्म, तिष्ठति काचित्, प्रज्ञायतेऽनयेति प्रज्ञा, स्पृष्टवान् पुट्ठो, 'तत्थे' ति तत्थ वेदनायां (अध्यासीत) अथवा अदीनतां थापयति प्रज्ञा, अथवा प्रज्ञालक्षणं ज्ञानमागमस्य हि फलं॥ कथं अधियासितं भवति? 'तेइच्छिन्नाभिणंदिज्जा' सिलोगो (८१ सू. १२०) चिकित्सितं चिकित्सा रोगप्रतीकार इत्यर्थः, अभिमुखो नन्दते अभिनंदते, सम्यक् तिष्ठते संचिक्खे, ण कूजति कक्कराय-ति वा, आत्मानं गवेषयतीत्यात्मगवेषकः चरित्रात्मानं, चारित्रात्मनि गवेष्यमाणे द्रव्यात्मापि गवेष्ट एव, न परित्यक्त इत्यर्थः, स्यात्कथं?, एवं खु तस्स सामण्णं एतदिति प्रत्यक्षः, श्रमणभावः श्रामण्यं, यदुत्पन्नेषु तत्प्रतिकारायोद्यमं न कुरुते, तंत्रमंत्रयोग-लेपादिभिः स्वयं करणं, न स्नेहविरेचनादिना स्वयं करोति, कारापणं तु वैद्यादिभिः, शक्यं हि निरोगेण श्रामण्यं कर्तुं, यस्तु रोगवानपि न सावद्यक्रियामारभते तं प्रतीत्योच्यते- एयं खु तस्स सामन्नं, जहा केण ण कतं? केण वा ण कारावियं?, भिक्खाए ओसहं दिन्नं, जहा कालासवेसियपुत्तस्स, तत्थ गाहा—' महुराए कालवेसिय ' (२१५-१२०) गामे महुराये जियसत्तुरण्णो काला णाम वेसिया, पडिरूवत्तिकाउं ओरोहे छूढा, तीसे पुत्तो कालाए कालवेसिउत्ति कुमारो, सो तहारूवाण थेराण अंतिए

रोग परीषहः ॥ ७७ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ॥८०-८१॥

दीप अनुक्रम [८१-८२]

धम्मं सोऊण पव्वइतो, एगविहारपडिमं पडिवन्नो, गतो मुग्गसेलपुरं, तस्स सद्धिं भगिणी हतसत्तुस्स रण्णो महिला, तस्स साधुस्स अंसिया उवलंबंति, सो य तिगिच्छं ण कारवेति सावज्जेति, पच्छा तीसे भगिणीए वेज्जो पुच्छितो, तेण केचिद्व्वसंजोगा संजोएऊण सा भणिया—आहारेण से सयं देज्जाहि, तो भिक्खाए समं दिण्णं, ताहे ताओ अंसियाओ पडिबद्धा गंधेण चेव, पच्छा सो चिंतेइ—मम णिमित्तेण राया भगिणी विज्जा य आरंभंति, किं मम जीविएण ?, भत्तं पच्चक्खामि मुग्गसेलसिहरे, तेण कुमारत्ते रत्तिं सियालाण सद्दं सोउं पुच्छिता ओलग्गगा-के एते जेसिं सद्दो सुव्वति ?, ते भणंति—एते सियाला अडविवासिणो, तेण भण्णति-एतं मम बंधिऊण आणेह, तेहिं सियालो बंधिऊण आणीतो, सो तं हणति, सो हम्मंतो खिक्खियति, तत्थ सो रतिं विंदइ, सो सियालो साहम्मतो मओ, अकामनिज्जराए वाणमंतरो जातो, तो वाणमंतरेण सो भत्तपच्चक्खाओ दिट्ठो, ओहिणा आभोतित्ता इमो सोत्ति आगंतूण सपेल्लियं सियालिं विउव्विऊण खिखियंतो खाति, राया तं साधुं भत्तपच्चक्खाययंतिकाउं रक्खावेति पुरिसेहिं, मा कोइ से उवसग्गं करेस्सइत्ति, जाव ते पुरिसा तं ठाणं एति ताव ताए सियालीए खइओ, जाहे ते पुरिसा ओस्सरेन्ता होंति ताहे सद्दं करेंती खाइ, जाहे आगता ताहे न दीसइ, सोऽवि उवसग्गं सम्मं सहति खमति, एवं अहियासेयव्वो, रोगपरीसहो सोलसमो समत्तो ॥

इदाणिं तणफासपरीहो—तृणानि स्पृशंतीत्यतो तणफासपरीसहो—'अचेलगस्स' सिलोगो (८२ सू. १२१) नास्य चेलमस्तीति अचेलः अतस्तस्य अचेलगस्स, 'लूहस्स' त्ति रूक्षो बाह्याभ्यन्तरतः, संजतस्य, तपोऽन्वितः तवस्सी,तवस्सिग्गहणं तपोयुक्तस्य हि रूक्षा तनुर्भवति, तस्य चास्तरणविवर्जितस्य आर्द्रभूम्यादिषु 'तणेसु सुयमाणस्स' तरतीति तृणं, तत्तु कुशादि, नतु

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ॥८२-८३॥

दीप अनुक्रम [८३-८४]

पलालादि, झुसिरैः,तेर्विषमसंधिभिः तीक्ष्णशिखैश्च होज्जा गातविराहणा, गच्छति गत इति वा गात्रं आविराधितं भवति,विविधराइं कृतं विराइतं-पंडरास्तस्य राजयो रूक्षस्योपतिष्ठंति, फालिज्जंति य दब्भेहिं, स्निग्धगात्रस्य हि पंडरा रेखा न भवंति, हिणिल्लसमाणेहि य ण तहा लंछिज्जति, स ताओ लीहाओ ण संलूसेति समहरवेति, ण वा भीतो तेसिं तणेसु ण सुविज्जा ॥ किंच- तेसु तणक्खएसु गीम्हे सरदि वा ' आतवस्स णिवातेणं ' सिलोगो, (सू० ८३-१२१) आताप्यते येन स आतपः, निपतनं निपातः,निपातो नाम स्वेद एव विशेषितः,तेन च निपातेन तृणक्षतेषु पुंडरेसु ' तिउला होइ वेदणा ' तुदतीति तिउला वेदना, यं च सह [मान]माणे सोढो तणफासपरीसहो भवति, नतु भयमानस्य,'एवं णच्चा ण सेवंति तंतुजं' एवं-इमं उपदेसं अथवा एवमपि ज्ञात्वा वेदणोदयमिमं तथावि अक्षुरणट्ठा ण सेवेज्जा तंतुज्जं, तनोत्यसौ तन्यते वा तंतु, तंतुभ्यो जातं तन्तुजं, अथवा तन्यत इति तंत्रं-वेमविलेखनंछनिकादि तत्र जातं तंत्रजं, तनुवस्त्रं कंबलो वा, तं ण सेवंति, जिणकप्पिया जे अचेला, ' तणताज्जिता ' तृणाग्रैः विषमैश्च तार्जिता--भर्त्सिता, सा यथा केन सहिता?, एत्थ संथारोत्ति दारं, तत्थ गाथा 'सावत्थीए कुमारो' गाथा (११६-१२२) सावत्थीए नयरीए जियसत्तुस्स रन्नो भद्दो नाम कुमारो, सो पव्वइतो, एगल्लविहारी पडिमं ठितो, सो विहरंतो वेरज्जे चारिउत्तिकाउं गहितो, सो बंधावेऊण खारेण तच्छितो, सो दब्भेहिं वेढिऊण मुक्को, सो दब्भेहिं लोहितसंमिलितेहिं दुक्खविज्जंतो सम्मं सहति, एवं सहितव्वं, 'तणफासपरीसहो गतो ॥ इदाणिं जल्लपरीसहो-'किलिन्नगाए मेधावी' सिलोगो (८४ सू० १२२) अस्नातस्य सुक्खेषु तनेसु स्वपतः स्वेदसंबंधात् जल्लेन किलन्नः कायो भवति, पच्यते च- 'किलिट्ठगाते' क्लिष्टो नाम रजोमलपरितापितः स एव किलिट्ठगाए, मेहया धावतीति मेधावी, पतंत्यस्मिन्निति पंकः, पंको नाम स्वेदाबद्धो मलः रजस्तु सर्वशुष्कः,

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [१] गाथा ||८४-८५||

दीप अनुक्रम [८५-८६]

कमढीभूतो जल्लो शुष्कमात्रस्तु रजः, पंकेन वा रएण वा, रज्यत इति रजः, यदा तु पंको भवति तदा न रज इत्यतो विपाके 'घिंसु वा परितापेणं' घिंसु वा नाम ग्रीष्मे, समंततो तापः परितापः, सज्जत इति सादः, अमानोनाः प्रतिषेधे, परिदेवनं नाम सातमाह्वयति, जहा जलाश्रयाः होन्ति नगो वेति, तहा चन्दनोसीरारक्षीपवायवः, एवं परिदेवति, न परिदेवमानः अपरिदेवमानः॥ स एवं अपरिदेवमानः सातं 'वेदेज्ज निज्जरापेही' सिलोगो (८५ सू० १२३) वेदेज्ज इति अनुगतार्थो, सम्यग् वेदेज्जा सि, नो तस्स पडिकारं करेज्जा सि, किमर्थं वेदेज्ज?- निज्जरं पेहीति, जल्लं धारयतो हि विउला निज्जरा भवति, एवं निज्जरां पेहमाणो, पेहति अभिलषतीत्यर्थः, 'आयरियं धम्माणुत्तरं' धम्मं ज्ञानं पश्यति चेति वाक्यशेषः, अथवा 'विद ज्ञाने' वेदेज्जा निज्जरापेही, शुद्धनयान् प्रतीत्योच्यते-वेदेज्ज निज्जरापेही, वेदितो जाणंतो इत्यर्थः, चरेति धम्मं, अथवा जल्लधारणमेव धर्मं, तं तु ' जाव शरीरभेदाए, यावत्परिमाणावधारणयोः, भिद्यतीति भेदः, जायते लीयते वा जल्लं 'जल्लो काए ण उवट्टे' उद्वर्त्तनमित्यर्थः, किमंग पुण सिणाणादिः, पठ्यते च ' जल्लं काएण धारए ' एस दव्वमलो भावमलनिज्जरणत्थं धारिज्जति, न च शक्यते निर्मलं शरीरं कर्तुं, यदि बाह्यवदंतओ, एत्थ दारं 'मलधारणे' त्ति, तत्थ गाहा 'चंपाए' गाहा (११७-१२३) चंपाए सुणंदो णाम वाणियओ, सावओ, आवणाओ चेव जो जं मग्गति साहू तस्स तं देइ ओसहभेसज्जं सत्तुगादीयं च, सव्वमंडिओ सो, तस्सऽण्णता गिम्हेसु साहूणो जल्लपरिदिद्धंगता आवणं आगता, तेसिं गंधो जल्लस्स ताण सव्वदव्वाण गंधे भिंदिउं उव्वरति, तेण सुगंधदव्वभाविएण चिंतितं-सव्वं लद्धं साहूणं, जति णाम जल्लं उवट्टेंता तो सुंदरं होतं, एवं सो अणालोइयपडिक्कंतो कालगतो कोसंबीए नयरीए इब्भकुले पुत्तत्ताए आयाओ, णिव्विन्नकामभोगो धम्मं सोऊण पव्वतितो, तस्स तं कम्मं उदिण्णं, दुब्भिगंधो जातो, जतो जतो

॥ ८० ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ॥८६-८७॥

दीप अनुक्रम [८७-८८]

गच्छति तओ तओ उड्डाहो, पच्छा सो साधूहिं भणिओ-तुमं मा निग्गच्छसि, उड्डाहो, पडिस्सए अच्छाहि, रत्तिं देवताए काउस्सग्गं करेति, पच्छा देवताए सुगंधो कतो, से जहानामए कोट्ठपुडाण वा०, पुणोऽवि उड्डाहो, पुणो देवताए आराधणं, सामावियगंधो जातो, तेण णाहियासितो जल्लपरीसहो, एवं णो णाधियासेतव्वं, जल्लपरीसहो गतो॥ इदाणिं सक्कारपुरक्कारपरीसहो, करणं कारः,शोभनकारःसक्कारः सक्कारमेव पुरस्करोति सक्कारपुरस्कारपरीसहो भवति,स त्वेवं सोढव्यः, स सत्कारः एवंविय'अभिवादण' गाहा (८६ सू० १२४) ' अभिवादणं ' अभिमुखं उड्डाणं ' सामी कुज्ज ' त्ति राया कुज्जा एताणि, णिमंतणं वस्त्रपात्रलेह्यावसधिभ्योराजाऽमात्यो वा मरुयाणं पासंडीणं वा अण्णं वा सक्कारं कुज्जा'जे ताइं पडिसेवंति'य इति अणिद्दिट्ठस्स उद्देसे'ताइं' ताणि अभिवादणादीणि प्रतिसेवंति- पडिसेविंति 'ण तेसिं पीहए मुणी' अहो इमे साहिया राजादिभिः पूज्यंते वयं नेति, कथमस्माकमप्येवंविधा पूजा स्यादिति, स तेसिं अपीहमाणो ' अणुक्कसाय ' गाहा (८७ सू० १२४) ' अणुक्कसायो ' अणुशब्दः स्तोकार्थः, अतो नेत्यनु, कषयंतीति कषायाः क्रोधाद्याः, न रुष्यत्यपूज्यमानः, न वा मानं करोति, मां लोकः पूर्वं पूजितवान् इदानीं न पूजयतीति ' अमहेच्छ :' अल्पेच्छ इत्यर्थः, न पूजासत्कारमासंशयति, अज्ञातैषी, न ज्ञापयत्यहमेवंभूतः पूर्वमासीत्, न वा क्षपको बहुश्रुतो वेति, आहारोपकरणादिषु अलोलुपः, न लोभ इत्यर्थः, भूयिष्ठत्वादाहारे लोप्यमस्य जंतोर्भवतीतिकृत्वा व्यपदिश्यते 'रसिएसु णातिगिज्झेज्ज'रससहितानि रसियाणि तेसु रसिएसु णोभिगिज्झेज्ज,अहवा रसेसु णाणुगिज्झेज्जा, रसाइं आर्द्रतादयः स्वस्थानपटवः यदा ये चानुकूलाः तेषु यथा पूर्वं गृद्धवान् तथा न गृध्येत, ये च रसानुत्कृष्टा नाहारयंति लभंति वा परं तत्र 'ण तेसिं पीहए मुणी ' पठ्यते चान्यथा ' नाणुतप्पेज्ज पण्णवं ' वा, यथा मया दुष्टं कृतं इह लब्धिपाषंडे सर्ववैरिणि वा प्रव्रजता, तत्रो-

॥ ८१ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [१] गाथा ॥८८-८९॥

दीप अनुक्रम [८९-९०]

दाहरणं ' अंग विज्जं ' ति 'महुराए इंददत्तो' गाहा (११८--१२५) अरहंतपइट्ठीताए महुराए नयरीए इंददत्तेणं पुरोहितेणं पासातगतेणं हेट्ठेणं साधुस्स वच्चंतस्स पाओ लंबितो सीसे कउत्तिकाउं, सो य सावएण सेट्ठिणा दिट्ठो, तस्स अमरिसो जातो, दिट्ठं भो एतेण पावेण साधुस्स उवरिं पादो कतोत्ति, तेण पइण्णा कया- अवस्सं मए तस्स पादो छिंदियव्वो, तस्स छिद्दाणि मग्गति, अन्नया अलभमाणो आयरियसगासं गंतूण वंदित्ता पडिकहेति, तेहिं भण्णति--का पुच्छत्ति, अधियासितव्वो सक्कारपुरक्कारपरीसहो, तेण भणियं--मए पतिण्णा कतेल्लिया, आयरिएहिं भण्णति--एयस्स पुरोहियस्स घरे किं वट्टइ ?, तेण भण्णइ--एयस्स पुरोहितस्स पासादो कतेल्लओ, तं तस्स पवेसणे रण्णो भत्तं कीरति, तेहिं भण्णति-जाहे राया पविसति तं पासादं ताहे तुमं रायं हत्थे गहेऊण अवसारेज्जासि, जहा पासातो पडति, ताहेऽहं पासातं विज्जाए पाडिस्सं, तेण तहा कयं, सेट्ठिणा राया भणिओ--एतेण तुब्भे मारिता आसि, रुट्ठेण रण्णा पुरोहितो सावगस्सेव अप्पितो, तेण तस्स इंदकीले पादो कओ, पच्छा छिन्न एव काउ लोहमआ काऊण सो छिन्नो, इतरो विसज्जितो, तेण णाधियासिओ सक्कारपुरक्कारपरीसहो। इदाणिं पण्णापरीसहो,प्रज्ञायते अनयेति प्रज्ञा, प्रगता ज्ञा प्रज्ञा, प्रज्ञापरीसहो नाम सो हि सति प्रज्ञाने तेण गव्वितो भवति तस्य प्रज्ञापरीषहः, प्रतिपक्षे ण प्रज्ञापरीषहो भवति, अविण्णाणमंतो हि ण अद्धिति करेति यथाऽहमविज्ञातवानिति, शक्यं प्रज्ञानं, दुःखतरं पुनरज्ञानं, सो बुद्धिमिति विचिंतयति, उच्यते कथं ?- 'किं कट्ठं अण्णाणं०' गाथा, तथा चोक्तं ' नैवंविधमहं मन्ये, जगतो दुःखकारणम्। यथाऽज्ञानमहारोगो, दुरंतमतिदुर्जयम् ॥ १ ॥' इति, पण्णाणं जह सहमाणस्स परीसहो भवति तथा अप्रज्ञानमपि सहितव्यं, ततो परीसहो भवति, तद्यथार्थमेवोच्यते ' से णूण मए पुव्विं ' गाहा (८८ सू० १२६) से इति पूरणे आत्मनिर्देशे वा, णूणमनुमाये ' मये ' ति आत्मन्युपगमे,

यथा कृतानि कर्माणि पूर्यतीति पूर्वं-पूर्वजन्मनि पूर्वं, क्रियंत इति कर्माणि, फलतीति फलं, अज्ञानं फलतीति अण्णाणफला, अज्ञानं फलमेषां, तदुदये सति येनाहं नाभिजानामि, अभिमुखं जानामि अभिजानामि 'पुट्ठो केणति कण्हुई' पृच्छ्यते स्म पृष्टः 'कण्हुयी' सुत्ते अत्थे वा, तत्रालंबनं--एतानि हि प्रज्ञानवध्यानि, मयैतानि प्रागुपात्तानि बध्धानीतिकृत्वा तद्भयात् पुनः प्रज्ञा बाध्यति तं न करिष्ये, यानि पूर्वं बद्धानि तानि 'अथ पच्छा उदेज्जंति' सिलोगो (८९ सू० १२६) अथेत्यव्ययं निपातः पूर्वकृतापेक्षः, किमपेक्षते ?, वेदितव्यं, उक्तं हि--'पावाणं खलु भो कडाणं कम्माणं पुव्विं दुच्चिण्णाणं दुप्पकंताणं वेदयित्ता मोक्खो, णत्थि अवेदइत्ता, तवसा वा जोसइत्ता' न च सर्वं बद्धं क्षयमवाप्नोति, प्राप्तकालमुदीयते, यानि तु अवश्यं वेदनीयानि तानि 'अह पच्छा उदिज्जंति' अज्ञानफलानि, तानि सम्यक् सहामीति वाक्यशेषः, यथैवायमेतेषां उदयः प्राप्तः एवं तत्क्षयोऽपि भविष्यतीतिकृत्वा 'एवमस्सासेति अप्पाणं' आश्वासनमाश्वासः आत्मनमात्मना, 'णच्चा कम्मविवागतं' विविधः पाके विपाकः, तत्स्वभावो हि विपाकता तां, अवश्यं हि कर्म्म, चैतन्यवन्तमवश्यमन्वेति इति वाक्यशेषः, अथवा विपाकता णाम विलक्षणंति, पाकानि हि कर्म्माणि यथा कृतानि उच्यंते इति, अत्रोदाहरणं 'सुत्ते' ति, एत्थ गाहा--'उज्जेणी कालखमणो' गाथा (११९-१२७) उज्जेणीए अज्जकालगा आयरिया बहुस्सुया, तेसिं सीसो न कोइ नाम इच्छइ पढिउं, तस्स सीसस्स सीसो बहुस्सुओ सागरखमणो नाम सुवन्नभूमीए गच्छेण विहरइ, पच्छा आयरिया पलायितुं तत्थ गता सुवण्णभूमीं, सो य सागरखमणो अणुयोगं कहयति, पण्णापरीसहं न सहति, भणति-खंता! गतं एयं तुब्भ सुयक्खंधं जावोकधिज्जतु, तेण भण्णति-गतंति, तो सुण, सो सुणावेउं पयत्तो, ते य सिज्जायरणिब्बंधे कहिते तस्सिसा सुवन्नभूमिं जत्तो वलिता, लोगो पुच्छति तं वृंदं गच्छंतं-

॥ ८३ ॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१] गाथा ॥८८-८९॥

दीप अनुक्रम [८९-९०]


जहण्णेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं सहस्सपुहुत्तं, बउसावि एगसमएणं केवतिया पडिवज्जमाणया, (सिय अत्थि सिय णत्थि) जति अत्थि जहण्णेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं सहस्सपुहुत्तं, पुव्वपडिवण्णया जहण्णेणं उक्कोसेणवि कोडिसयपुहुत्तं, एवं कुसीलपडिसेवगावि, कसायकुसीला पडिवज्जमाणया जति अत्थि जहण्णेणं एक्को, उक्कोसेणं सहस्सपुहुत्तं, पुव्वपडिवण्णया जहण्णेणवि उक्कोसेणवि कोडिसहस्सपुहुत्तं, णियंठा पडिवज्जमाणया जति अत्थि जहण्णेण एक्को वा दो वा तिन्नि वा, उक्कोसेणं बावट्ठं [ति]सतं, खवगाणं चउप्पण्णा होंति, उवसमगाण उ पुव्वपडिवण्णया जति अत्थि जहण्णेणं एक्को वा दो वा तिण्णि वा, उक्कोसेणं सयपुहुत्तं, सिणाया पडिवज्जमाणया जति अत्थि जहण्णेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं अट्ठसयं, पडिवन्नस्स जहण्णेण उक्कोसेणवि कोडिपुहुत्तं। एते णं भंते, पुलागबकुसकुसीलणियंठसिणायाणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोतमा! सव्वत्थोवा णियंठा, पुलागा संखेज्जगुणा, सिणाता संखेज्जगुणा, बउसा संखेज्जगुणा, पडिसेवणाकुसीला संखेज्जगुणा, कसायकुशीला संखेज्जगुणा इति ॥ उक्तो नामनिष्पन्नो निक्षेपः, इदानीं सूत्रालापकस्यावसरः, असति सूत्रे कस्यालापकाः?, सूत्रं च सूत्रानुगमे भविष्यति, तत्रानुगमो द्विविधः-सूत्रानुगमो निर्युक्त्यनुगमश्च, निर्युक्त्यनुगमस्त्रिविधः– निक्षेपनिर्युक्तिः उपोद्घातनिर्युक्तिः सूत्रस्पर्शिकानिर्युक्तिश्च, यो यस्य विषयः स पूर्वोक्तः, सूत्रादिचतुष्टयं युगपद्गच्छति, एत्थ य सुत्ताणुगमो इत्यादि, सूत्रानुगमे सूत्रमुच्चार्यते,तच्चेदं-'सिद्धाण णमोकिच्चा' (६९९) इत्यादि, सिद्धस्यैवाध्ययनस्य प्रकटार्थस्यादि यत्किंचिद्वक्तव्यं तदुच्यते–सिद्धार्थानां परिनिष्ठितार्थानां नमस्कृत्वा संयतानां च, भावतः परमार्थतः, धर्म्मवतां तथ्यां अनुशास्तिं शृणुत मम, क एवमाह?-सुधर्म्मस्वामी, आख्यानकप्रबंधेन कथयति, अत्थि मगहाविसए रायगिहं

पुलकादि-स्वरूपं.

॥२५९॥

प्रत सूत्रांक [१२...] गाथा ||६९९-७५८||

दीप अनुक्रम [७१३-७७२]



श्रीउत्तरा० चूर्णौ २१ समुद्र पा० ॥२६०॥

नयरं, तत्थ सेणिओ राया विहारजत्ताते निग्गतो, विहारजत्ता परिभणिया भण्णति, तन्निमित्तं निग्गतेण मंडिकुच्छीनाम चेइयं, तहिं ठितो साहू दिट्ठो, झाणं झियायति, तत्थ तेसिं समुल्लावो--रण्णो साधुस्स य, एत्थ अज्झयणे वण्णिज्जति, प्रायसः प्रकटार्थ एव, स राजा तं साधुं दृष्ट्वा परं विस्मयं गतः, अहो अस्य साधोः रूपसौभाग्यसौम्यवत्ता क्षांतिमुक्ति असंगवत्ता च भोगेषु लक्ष्यते, तस्य पादौ प्रणम्य प्रदक्षिणं च कृत्वा नातिदूरे निषण्णः, ततो ब्रवीति, (कथं)तरुणो रूपवान् प्रव्रजितः?, साधुरुवाच- अनाथोऽहं, मम सुहृन्न विद्यते, अनुकंपको वा, ततो राजा प्रहसितः, एवंगुणसमेतस्य कथं नाथो तव न विद्यते ?, अहं तव नाथो भवामि, साधुरुवाच--त्वमपि अनाथ एव, मम नाथत्वं कथं करिष्यसि?, एवं साधो राज्ञश्च संवादो वर्ण्यते, जाव विहरति वसुधं विगतपापोत्ति ब्रवीमि, नयाः पूर्ववत् ॥ **विंशतितममध्ययनं महानियंठिज्जं** २० ॥

उक्तं विंशतितममध्ययनं, इदानीं एकविंशतितमं, तस्य कोऽभिसंबंधः ?, विंशतितमे निर्ग्रंथोऽभिहितः, एकविंशतितमे विविक्तचर्याऽभिधीयते, स च निर्ग्रंथो विविक्तचर्यासहित एव भवतीति, नान्यः, अनेन संबंधेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयं व्यावर्ण्य नामनिष्पन्ने निक्षेपे आदाणपदेन समुद्दपालिज्जं नाम, अर्थतो विविक्तचर्यानामाध्ययनमिदानीं एकविंशतितमं, नामनिक्षेपं करोति 'समुद्दपालिय'मिति, 'निक्खेवे' इत्यादि (४२९) नामादिको चतुर्द्धा निक्षेपः, नामस्थापनाद्रव्याणि पूर्ववत्, भावे समुद्रपालितायुर्वेदंतो भावतो तु णातव्वो, ततो समुद्दितमिणं समुद्दपालिज्जमज्झयणं, उक्तो नामनिष्पन्नो निक्षेपः, इदानीं सूत्रालापकस्यावसरः, अस्माद्यावत्सूत्रं निपतितं तावद्वक्तव्यं, सूत्रं चेदं— 'चंपाए पालिए नाम'मित्यादि (७५९–४८४) सूत्रोक्तमेवार्थं यत्पुनः निर्युक्तिकारो ब्रवीति तत्पुनरुक्तं, तत् ज्ञापयति— वैराग्यभावना येन जायते

निक्षेपाः

॥२६०॥


अध्ययनं -२०- परिसमाप्तं

अत्र अध्ययन -२१- "महानिर्ग्रन्थिय" आरभ्यते

न तत्पुनरुक्तं, यत्संयमपुष्टिकारमेव भवति, तथा च आह— 'सज्झायज्झाणतव०' गाथा ॥ इदानीमाख्यानकप्रबंधेन तस्योत्पत्तिसंबंधि कारणं चाभिधीयते—चंपा णाम णगरी, तत्थ पालित्तो णाम सत्थवाहो, अहिगतो जीवाजीवे(दि)सु पदार्थेषु, अरहंतसासणरतो, सो अन्नया कयाई पोएणं पत्थितो, मणिमधरिमभरिएणं, गणिमं पूगफलज्जातिफलक्कोलादि, समुद्दतीरे पिहुंडं नाम नगरं संपत्तो, तत्थ य वाणियएणं दारिया दिन्ना, विवाहिता य, अन्नया कयाइ तं पत्तिं आवण्णसत्तं घेत्तूण पत्थितो सदेसस्स, सा समुद्दमज्झंमि पसवती पुत्तं पियदंसणं लक्खणजुत्तं, तस्स समुद्दपालेत्ति नामं कयं, पंचधाईहिं परिक्खित्तो परिवड्ढति, बावत्तरिकलापंडितो जातो, ततो जुव्वणपत्तस्स कुलरूवाणुसरिसं चउसट्ठिगुणोपेतं रूविणीनामभारियं आणावेति, सो रूविणीए सहितो दोगुंदओ व देवो भुंजति भोए निरुव्विग्गो। अह अन्नया कयाई सो ओलोयणचिट्ठिते पासत्ति(नगरं),वज्झं णीणिज्जंतं पासेति, तं दट्ठूणं सन्नी विन्नेगी णाणी सुकियदुक्कियाणं कम्माणं जाणती फलविवागं, चरित्तावरणीयकम्माणं खओवसमेणं च संबुद्धो संवेगमणुत्तरं च संपत्तो आपुच्छिऊण जणणिं णिक्खंतो, खायकित्तीओ, काऊण तवच्चरणं बहूणि वासाणि सो धुयकिलेसो तं ठाणं संपत्तो जं संपत्ता ण सोयंति, एषोऽर्थः सूत्रेऽभिहित एव, तथापि निर्युक्तिकारेणाभिहितः, द्विबंधं सुबद्धं भवतीति। इदानीं सूत्रे यत्किंचिद्वक्तव्यं तद् ब्रवीमि 'जहित्तु'ऽसग्गंथ'॥ (७५९-६८६)॥ इत्यादि,'ओहाकृत्यागे' त्यक्त्वा असद्ग्रन्थं-कर्म्म अशोभनं कर्म्म अशुभकर्म्मगतिबन्धात्मकं, नरकतिर्यग्योनिप्रायोग्यमित्यर्थः, तं, महान् क्लेशो यस्मिन् तं महाक्लेशं, महान्मोहो यस्मिँस्तन्महामोहं, कृष्णं कृष्णलेश्यापरिणामि, भयानकं, असद्ग्रन्थं त्यक्त्वा संयमपर्याये स्थित्वा श्रुतधर्म्मे अभिरुचिं करोति, व्रतानि—महाव्रतानि, शीलानि च-उत्तरगुणानि, तानि च अभिरोचयति, तथा परीषहा सहति अहिंसयान्नित्यादि, सव्वेहिं

प्रत सूत्रांक [१२...] गाथा ||७५९-७८२||

दीप अनुक्रम [७७३-७९६]



श्रीउत्तरा० चूर्णौ २१ समुद्रपा० ॥२६२॥

भूतेहिं इत्यादि गतार्था। 'कालेण' इत्यादि(७७२-६८७) कालेण कारणभूतेन यद् यस्मिन् काले कर्त्तव्यं तत् तस्मिन्नेव समाचरति, स्वाध्यायकाले स्वाध्यायं करोति, एवं प्रतिलेखनाकाले प्रतिलेखयति, वैयावृत्यकाले वैयावृत्यं, उपसर्गकाले उपसर्गं, अपवादकाले अपवादं करोति, राष्ट्रविषये आत्मनश्च बलाबलं ज्ञात्वा, सिंह इव साध्वसजादेत(सो) न त्रासं गच्छति, वाङ्मात्रमेव इदं, असत्यमपि न चिंतयति, स तत्र गच्छति, एवं सर्वार्थेषु रागद्वेषात्मकेषु दृढो भवति। 'उवेहमाणो' इत्यादि (७७३-४८७) उपेक्षां कुर्वन् परिव्रजति, प्रियमप्रियं सर्वं समानं सर्वकार्येषु अभिरोचयति, अपवादं न सर्वकालमेव रोचयतीत्यर्थः, न चापि पूजायां सक्तिं करोति, न च परापवादं करोति। 'अणेगछंदा' इत्यादि (७७४) यावत्परिसमाप्तं, छन्दोऽभिप्रायः, अनेकाभिप्राया इह मानवेषु दृश्यन्ते, रागद्वेषात्मको यस्तेष्वनिष्टेषु द्वेषं करोति स कर्म्मबन्धको भवति, के च ते ?, भयानकाः- भैरवाः, तत्र तस्मिन् मनुष्यलोके उपगच्छन्ति दिव्या मानुष्याः तैरश्चा वा, तथा परीषहा अनेके उदयं गच्छंति यत्र सीदन्ति कातराः, स भिक्षुस्तत्र न सीदति, संग्राममध्ये इव हस्तिराजा, परीषहा विशेष्यन्ते, शीतोष्णदंशमशकादयः, आतंका-रोगाः, ते च नानाप्रकाराः स्पृशंति तान्, अक्कर्करः- अनाक्रन्दं, अधियासेति, राजसैः पुराकृतानि कर्माणि क्षपयति, प्रहाय रागं च द्वेषं च अज्ञानं च विचक्षणो भिक्षुः, मेरुर्यथा वायुना न चाल्यते, एवं परीसहोपसर्गैर्यथा न चाल्यते तथा करोति, तथा नात्यर्थमुन्नतेन न चात्यर्थमवनतेन, किं ?-युगान्तरप्रलोकिना गन्तव्यं, महर्षिणाम महान्तं वा एषते यः स महर्षी, मोक्षार्थीत्यर्थः, न पूजायां सक्तिं करोति, न चापवादं करोति, किन्तु ऋजुभावं प्रतिपद्यते, स एवंविधः निर्वाणमार्गमुपैति। 'संयमे अरइरइसहे०'॥७७९-४८७॥ संयमे अरतिः असंयमे च या रतिः तां सहति, संस्तवो वचनसंस्तवः संवासश्च तच्च त्यजति, अकर्त्तव्येषु विरतः, स आत्मसहितं करोति, प्रधानश्च भवति,

समुद्रस्य साधुता

॥२६२॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [१२...] गाथा ||७८३-८३१||

दीप अनुक्रम [७९७-८४६]

श्रीउत्तरा० चूर्णौ २२ रथनेमीयं ॥२६३॥

परमार्थपदानि-ज्ञानदर्शनचारित्राणि, तेषु तिष्ठति, मिथ्यादर्शनादीनि श्रोतांसि छिन्नानि-अपगतानि तस्य, न क्वचित् ममीकारः, ततः न किञ्चनं विद्यते तस्य । 'विविक्ताणि'॥७८०-४८७॥स्त्रीपशुपण्डकविवर्जितानि लयनानि सेवति, तान्येव विशेष्यन्ते, अकृतमकारितमसंकल्पितानि संयमोपघातविरहितानि पूर्वऋषिभिः आचीर्णानि सेवति, तथा परीषहांश्च सहति, शोभनं ज्ञानं सज्ज्ञानं, सज्ज्ञानेन उपगतः महर्षिः, नास्य उत्तरो विद्यत इत्यनुत्तरं, सर्वप्रधान इत्यर्थः, तं अनुत्तरं धर्म्मसंचयं चरेत्ता मूलगुणज्ञानधारी भ्राजते सूर्य इव अन्तरिक्षे, स एवंगुणविशिष्टः शुभाशुभकर्म्मविप्रमुक्तः संशुद्धज्ञानदर्शनधरः तीर्त्वा संसारं समुद्रमिव समुद्रपाले अपुणागमं गतिं गतोत्ति, इति परिसमाप्तौ, नयाः पूर्ववत्, ब्रवीम्याचार्योपदेशात् ॥ एकविंशतितमं अध्ययनं समाप्तं ॥

उक्तं एकविंशतितमं, इदानीं द्वाविंशतितमं, तस्य कोऽभिसम्बन्धः ?, एकविंशतितमे विविक्तचर्याऽभिहिता, द्वाविंशतितमे वृत्ति(धृति)श्चरणं च वर्ण्यते,सा च विविक्तचर्या धृतिमता चरणसहितेन च शक्यते कर्तुम्,अनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद् व्यावर्ण्य नामनिष्पन्ने निक्षेपे रहणेमिज्जंति-'रहनेमी निक्खवो०' ॥४४३॥४४४॥४४५-४८८॥ इत्यादि गाथात्रयं गतार्थं, तत्र कोऽसौ हरि(रह) णेमी?, तस्योत्पत्तिः गाथानुसारेणैव च विज्ञेया,सिवात्ति देवी अणोज्जंगी,किमुक्तं भवति?-अनुपमाङ्गी, प्रथमाङ्गी इत्यर्थः, रहनेमिस्स चत्तारि वरिससते गिहत्थत्तं, एगं वरिसं छउमत्थे, पंच वर्षशते केवली, उक्तो नाम-निष्पन्नो निक्षेपः । इदानीं सूत्रालापकस्यावसरः, अस्मात् यावत् सूत्रं निपतितं तावद्वक्तव्यं, सूत्रं चेदं-'सोरियपुरंमि नयरे०' ॥ ७८३-४९१ ॥इत्यादि, सर्वं गाथानुसारेणेव णेयं यावत् 'जहा से पुरिसोत्तमो' त्ति बेमि, नयाः पूर्ववत्, ब्रवीम्याचार्योपदेशात्, द्वाविंशतितममध्ययनं रहनेमिज्जं समाप्तम् ॥

रथनेमि निक्षेपादि

॥२६३॥


अध्ययनं -२१- परिसमाप्तं

अत्र अध्ययन -२२- "रथनेमिय" आरभ्यते

अध्ययनं -२२- परिसमाप्तं

प्रत सूत्रांक [१२...] गाथा ||८३२-९२०||

दीप अनुक्रम [८४७-९३५]



श्रीउत्तरा० चूर्णौ २३ केशिगौत० ॥२६४॥

उक्तं द्वाविंशतितमं, इदानीं त्रयोविंशतितमं, तस्य कोऽभिसम्बन्धः ?, द्वाविंशतितमे धृतिश्चरणं च वर्णितं, सा धृतिर्धर्म्मे कर्त्तव्या, चरणं पुनश्चारित्रधर्म्म एव, अनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद् व्यावर्ण्यं नामनिष्पण्णे निक्षेपे केसीगोतमिज्जंति - 'निक्खेवो गोअमंमी चउक्कओ०' ॥४५१॥४५२॥४५३-४९८॥ इत्यादि गाथात्रयं गतार्थं, उक्तो नामनिष्पण्णो निक्षेपः । इदानीं सूत्रालापकस्यावसरः, अस्माद् यावद् सूत्रं निपतितं तावद्वोद्धव्यं, सूत्रं चेदं-'जिणे पास-त्ति णामे' इत्यादि (८३२-४९९) सर्वं हृदि व्यवस्थाप्य यत्किंचित् वक्तव्यं तदुच्यते, अस्य पार्श्वस्वामिनः केशी नाम शिष्यो, ज्ञान-चरणसंपन्नो बहुशिष्यपरिवारः श्रावस्त्यां तिंदुकनाम उद्यानं तत्र समवसृतः, अथ तस्मिन्नेव काले वर्द्धमानस्वामिनः शिष्य इंद्र-भूती गौतमगोत्रः, तस्यैव नगरस्य बहिः कोष्ठकं नामोद्यानं तत्र स्थितः, द्वावपी अत्यर्थं लीनौ, मनोवाक्कायगुप्तावित्यर्थः, सुस-माहितौ, ज्ञानादिसमाधियुक्तावित्यर्थः, उभयोरपि शिष्याणां चिन्ता समुत्पन्ना-तुल्ये तीर्थकरत्वे किमिति शिक्षोपादाननानात्वं?, अथ तौ तत्र विज्ञाय शिक्षाणां प्रवितर्कितं समागमकृतमतीकौ द्वावपि केशिगोतमौ पूर्वतरं ज्येष्ठ इतिकृत्वा केशीं गौतमः प्रति विनयाद् यावद् शिष्यपरिवृतो तिंदुकोद्यानमुपगतः, तस्येदानीं केश्याचार्यः(स्य) अनुरूपां प्रतिपत्तिं कर्तुमुद्यतः, पलालांकुशतृणानि च साधुप्रायोग्यानि भूमौ निषद्यादुपरि निषद्यां च दापयति, तौ केशीगौतमौ भ्राजेते चंद्रसूर्यसमप्रभौ । तौ समागतौ ज्ञात्वा बहवः पाषंडा गृहस्था देवदानवाश्च समागताः, तयोः किल विवादो भविष्यति, ततः केशी गौतमं पृच्छति, गौतमोऽपि केशीं ब्रवीति, पृच्छ पृच्छस्वेति, यमा-महाव्रतानि, तव तत्र पार्श्वस्वामिना चत्वारि महाव्रतानि अभिधीयंते, तानि वर्द्धमानस्वामिना पंच, एक-कार्यप्रवृत्तानां किमिति विसंवादः?, कार्यं मोक्षः, केशिमेवं ब्रुवाणं गौतमः स प्रज्ञायते प्रज्ञा प्रज्ञया-ज्ञानेनालोच्य तत्त्वातत्त्वानां च

केशिगौतम समागमः

॥२६४॥

अत्र अध्ययन -२३- "केशिगौतमिय" आरभ्यते

प्रत सूत्रांक [१२...] गाथा ||८३२-९२०||

दीप अनुक्रम [८४७-९३५]

श्रीउत्तरा० चूर्णौ २३ केशिगौत० ॥२६५॥

पदार्थानां विनिश्चयं आलोच्य देशकालानुरूपं धर्मं कथयंति तीर्थकराः, किं तद्विप्रत्ययकारणं ?, तदुच्यते, द्वादश कारणानि, सूत्रोक्तानि) एव निर्युक्तिकारेण प्रोक्तानि, 'सिक्खा वया य' इत्यादि (४५५-६-७) गाथात्रयसंगृहीतानि, शिक्षापदानि पंच महाव्रतानि, चत्वारि किमित्यभिहितानि प्रथमं, तथा लिंगद्विविध्यं किमिति द्वितीयं, आत्मा कषाया इंद्रियाणि च शस्त्रं तत्तृतीयं, पाशानां अवकर्शनं, वृत्तीच्छेदने पाशानां छेदनमित्यर्थः, रागद्वेषादयः पाशः, चतुर्थं तंतूद्धरणबंधने, तंतू-भवलता उद्धरणं-नाशनं तद् बंधने कृते भवलता(उद्धृता)भवति, अग्निविध्यायनं च पंचमं, अग्निः कषायः निर्वापणं श्रुतं शीलं च६,दुष्टाश्वो मनः७, पथः सम्यग्ज्ञानदर्शनचारित्राणि तस्य परिज्ञानं ८, महापरिश्रोतानि-मिथ्यादर्शनाविरतिप्रमादकषाययोगाः तेषां निवारणं ९, संसारार्णवस्य पारगमनं १०तमः-अज्ञानं तस्य विघाटं-प्रकाशीकरणं ११, मोक्षस्थानस्य उपसंपदा, मोक्षस्थानप्राप्तिरित्यर्थः१२, एवमेतानि द्वादश स्थानानि सूत्रे व्याख्यातानि, पुरिमाण दुव्विसोज्झो उ इत्यादि, प्रथमतीर्थकरशिष्याणां दुर्विशोध्यः संयमः, ऋजुजडत्वात्, पश्चिमतीर्थकरशिष्याणां दुरनुपालकः संयमः, वक्रजडत्वात्, मध्यमतीर्थकरशिष्याणां ऋजुप्रज्ञत्वात् सुविशोध्यः सुखं चानुपाल्यः, अतो-अनेन कारणेन द्विधा प्रकल्पितः।'साधु गोतम'इत्यादि, सर्वत्र पृच्छा उत्तरं च बोद्धव्यं, तथा अ(स)चेलको मध्यमतीर्थकरैः, स(अ)चेलकः प्रथमपश्चिमैर्धर्म्मः प्रदर्शितः,लिंगद्वैविध्येऽपि इदमेव कारणं,तथा च संयमयात्रार्थमात्रकं(ग्रहणं)अग्रहणं भवितव्यमिति, परमार्थतस्तु ज्ञानदर्शनचारित्राणि मोक्षकारणं, न लिंगादीनि, एवं द्वादशसु कारणेषु व्याख्यातेषु केश्याचार्यो गौतमस्य स्तुतिं करोति, साधु गोमत ! पन्ना ते, छिन्नो मे संसओ इमो। नमो ते संसयातीत !, सव्वसुत्तमहोदही ॥ ९१६ ॥ एवं तु संसए छिन्ने, केसी घोरपरक्कमो। वंदित्तु पंजलिउडो, गोतमं तु महामुणी ॥९१७॥ पंचमहव्वयजुत्तं, भावतो

विप्रत्यय-कारणानि

॥२६५॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [१२...] गाथा ||९२१-९४७|| दीप अनुक्रम [९३६-९६२]

श्रीउत्तरा० चूर्णौ २४ प्रवचन० ॥२६६॥


पडिवाज्जिया। धम्मं पुरिमस्स पच्छिमंमि मग्गे सुहावहे॥९१८॥ तोसिता परिसा सव्वा, सम्मत्ते पज्जुवत्थिया। संजुता ते पदीसंतु, भगवं केसीगोतमं॥९२०-५१३॥त्ति बेमि। नयाः पूर्ववत्, ब्रवीमीत्याचार्योपदेशात्, त्रयोविंशतितमं॥ उक्तं त्रयोविंशतितमं, इदानीं चतुर्विंशतितमं, तस्य कोऽभिसंबंधः ?, त्रयोविंशतितमे धर्मो व्याख्यातः, स धर्मः समितिगुप्तिं विना नैव भवति, ताश्च चतुर्विंशातिमे व्याख्यायंते, अनेन संबंधेनायातस्यास्याध्ययनस्यानुयोगद्वारैश्चतुष्टयं पूर्ववद्यावर्ण्यं नामनिष्पन्ने निक्षेपे समितीउ-समितयः पंच तिस्रो गुप्तयः एताः प्रवचनमातरोऽभिधीयंते, तत्र प्रवचनशब्दस्य तावन्निक्षेपः 'निक्खेवो पवयणंमि'गाथाद्वयं (४५८-९।५१४) व्यतिरिक्तं कुतीर्थिकप्रवचनं, भावप्रवचनं द्वादशांगं गणिपिटकं, पिटकशब्दः समुदायवाची, प्रोच्यते अस्मिन् जीवादयः पदार्था इति प्रवचनं॥ इदानीं मातृशब्दस्य निक्षेपः 'मातंमि उ निक्खेवो' इत्यादि गाथाद्वयं (४६०-१।५१४) व्यतिरिक्तं भाजने द्रव्यमातं, स्थितमित्यर्थः, भावे समितिगुप्तिषु प्रवचनं मातं, स्थितमित्यर्थः, 'अट्ठसु इ' इत्यादि(४६२-५१४)गतार्था,उक्तोनामनिष्पन्नो निक्षेपः,इदानीं सूत्रालापकस्यावसरः, अस्माद्यावत् सूत्रं निपतितं तावद्वक्तव्यं,सूत्रं चेदं'अट्ठ उ पवयणमाता'इत्यादि गाथात्रयं(९२१-२३।५१५,गतार्थं,'आलंबणेन'गाथाद्वयं(९२४-५।५१६)ईर्यासमितिरभिधीयते, 'ईर गतिप्रेरणयोः' ईर गतौ, गंतव्यं गमनं, तत् कारणपरिशुद्धं वक्तव्यं, तद्यथा-आलंबनेन कालेन मार्गेण उपयुक्तेन च, आलंबनेन-कारणेन, चैत्यवंदनआचार्यादिप्रयोजनशरीरचिंतादिना कारणेन गमनं कर्त्तव्यं, न हि निर्निमित्तं, तथा आगमेऽप्यभिहितं 'जाव णं अयं जीवे एयति वेयति चलती'त्यादि, कालेन यद्यस्मिन् काले कर्त्तव्यं तस्मिन्नेव करोति, यथा भिक्षाकाले भिक्षार्थं पर्यटति, एवं सर्वकाले मंतव्यं, मार्गेण संयमोपघातरहितेन गंतव्यं, यत्नेन युगांतरप्रलोकिना उपयुक्तेन गंतव्यं, समितयः ॥२६६॥

अध्ययनं -२३- परिसमाप्तं

अत्र अध्ययन -२४- "प्रवचनमातृ" आरभ्यते

प्रत सूत्रांक [१२...] गाथा ||९२१-९४७||

दीप अनुक्रम [९३६-९६२]



श्रीउत्तरा० चूर्णौ २४ प्रवचन० ॥२६७॥

इंद्रियार्थाव्याक्षिप्तेन गंतव्यं, न च स्वाध्यायं कुर्वता गंतव्यं, तन्मूर्त्तिना तदेव पुरस्कृत्य गंतव्यं। इदानीं भाषासमितिः-'कोहे माणे य' इत्यादि गाथाद्वयं(९२९-३०।५१७)क्रोधादिविरहितेन उपयुक्तेन भाषा भाषणीया, तथा चोक्तं-"पुव्वं बुद्धीए पासेत्ता,पच्छा वक्कमुदाहरे"इदाणीं एषणासमितिः'गवेसणा य'इत्यादि गाथाद्वयं(९३१-३।५१७)अन्वेषणग्रहणपरिभोगैःत्रिभिः कारणैराहारुपधिशय्या विशोधयेत्,उद्गमोत्पादना च गवेषणाऽभिधीयते,ततः ग्रहणं,ततः परिभोगैः, चउकं विशोधयेत्, संयोजना प्रमाणं अंगारः धूमे कारणे च। इदानीमादाननिक्षेपणासमितिः-"ओहोवहिउवग्गहितं" इत्यादि गाथाद्वयं(९३३-४) द्विविधो उपधिः-औधिको औपग्रहिकश्च, इमं विधिं प्रयुंजीत-पूर्वं चक्षुषा प्रतिलेख्य पश्चाद्यत्नेन मृदुना प्रमार्जयेत्, इदानीं प्रतिष्ठापनासमितिः- 'उच्चारं पासवणं'इत्यादि गाथा(९३५।५१८)गतार्थं। उक्ताः समितयः,इदनीं गुप्तयोऽभिधीयंते,मनोगुप्तिः वचनगुप्तिः कायगुप्तिरिति, तत्र मनोगुप्तिश्चतुःप्रकारा, सत्या मृषा सत्यामृषा असत्यामृषा चेति चतुर्विधा मनोगुप्तिः, संरंभसमारंभात्मकं सत्यं न चिंतयति, एवं सत्यामृषं न चिंतयति, 'संकल्पः संरंभः परितापकरो भवेत् समारंभः। आरंभः व्यापत्तिकरः शुद्धनयानां तु सर्वेषां॥१॥एवं वाग्गुप्तिरिति विज्ञेया,इदानीं कायगुप्तिः'ठाणे निसियणे' इत्यादि गाथाचउकं(९४४-७।५२०)स्थानं कायोत्सर्गादि, निषीदनं त्वग्वर्त्तनं ऊर्ध्वं लंघनं उल्लंघनं, उत्क्षेपणं विक्षेपणं चेत्यर्थः,इंद्रियाणं युंजनं, स्थविरकल्पे जिनकल्पे वा स्थितः समारंभे आरंभे वा कायं वर्त्तमानं निवर्त्तयेत् यत्नेन, समितयश्चरणस्य प्रवर्त्तने, गुप्तयः अशुभनिवृत्तये, ता एताः प्रवचनमातरो यः समाचरति संसाराद्विमुच्यत इति,नयाः पूर्ववत्।मार्गाख्यं२४॥

इदानीं पंचविंशतितमं,तस्य कोऽभिसंबंधः?,चतुर्विंशतितमे समितयो गुप्तयश्च व्यावर्णिताः, पंचविंशतितमे ब्रह्मगुणा व्यावर्ण्यंते, तच्च ब्रह्म समितिभिर्गुप्तिभिर्विना नैव भवति, अनेन संबंधेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद्व्यावर्ण्य नामनिष्पन्ने

गुप्तयः


॥२६७॥

अध्ययनं -२४- परिसमाप्तं

अत्र अध्ययन -२५- "यज्ञीय" आरभ्यते

प्रत सूत्रांक [१२...] गाथा ||९४८-९९१||

दीप अनुक्रम [९६३-१००६]




श्रीउत्तरा० चूर्णौ यङ्गीया० ॥२६८॥

निक्षेपे जण्णइज्जं,'णिक्खेकेवो जण्णंमी'त्यादि गाथाद्वयं(४६३-४।५२१)व्यतिरिक्तं ब्राह्मणादीनां जयनं,भावयज्ञः तपःसंयमानुष्ठानं, अध्ययननिरुक्तगाथा 'जयघोसा' इत्यादि (४६५।५२१) गतार्था । उक्तो नामनिष्पन्नो निक्षेपः, इदानीं सूत्रालापकस्यावसरः, अस्माद् यावत् सूत्रं निपतितं तावद्वक्तव्यं,सूत्रं चेदं-'माहणकुलसंभूतो'(९४८५२३)इत्यादि प्रायसः गतार्थं, तथापि यत्किंचिद्वक्तव्यं तदुच्यते,यथा इदं प्रवृत्तं तथा कथ्यते-वाणारसीए नगरीए दो विप्पा भायरो य, जमलाऽऽसी,जयघोसो विजयघोसो, तत्थ जयघोसो ण्हातुं गतो गंगं, तत्थ पेच्छति सप्पेण मंडुक्कं गसिज्जंतं, सप्पोऽवि मज्जारेण छन्नो, मज्जारो सप्पं अक्कमिउं ठितो, तथावि सप्पो मंडुक्कं चिच्चयंतं खायेति, मज्जारोवि सप्पं चडप्पडमाणं खायति, तं अण्णमण्णघाता इत्यादि सर्वा निर्युक्तिगाथा गतार्था,जायाई जयनशीलः, 'जमजन्नंति'(यम)तुल्यो यमयज्ञः, मारणात्मकः, इंद्रियग्रामं निगृह्णाति, सम्यग्दर्शनादिमार्गगामी, अथ तस्मिन् काले जयघोसेण यज्ञः प्रस्तुतः, ततोऽसौ (वि)जयघोषः मासक्षपणपारणके भिक्षार्थं समुपस्थितः, तेनासौ प्रतिषिद्धः, न ते दास्यामि भो भिक्षां, ये च वेदविदो विप्रा, ये च यज्ञस्य याजिनः। ज्योतिषांगविदो ये च, ये च धर्म्मस्य पारगाः॥१॥ ये समर्थाश्च उद्धर्त्तुं, आत्मानं परमेव वा। तेषामिदं तु दातव्यं, अन्नदानं हितैषिणा॥२॥तत्त्वं वेदमुखं वक्षि, यज्ञानामपि यन्मुखं। नक्षत्राणां मुखं यच्च, धर्माणां चापि यन्मुखं॥३॥ ये समर्थाश्च उद्धर्त्तुं, आत्मानं परमेव वा। तेनापि त्वं न जानीषे, अथ ज्ञानी ततो भण॥४॥ अस्याक्षेपस्य उत्तरं दातुं अशक्तः, ततोऽसौ सपरिवारः ब्रवीति-भगवन्! ब्रूहि सर्वं यथा तथा,-अग्निहोत्रमुखा वेदा, यज्ञार्थं वेदसां मुखं । नक्षत्राणां मुखं चंद्रः, धर्म्माणां काश्यपो मुखं ॥ १ ॥ राहुमुक्तं यथा चंद्रं, नमस्यंति अजानकाः । एवं वेदविदः केचित्, ब्रह्मतत्त्वं न जानते ॥ २ ॥ यो गृहान्निर्गतस्सन् न पुनस्तत्रैव सज्जति, यश्च प्रव्रजन् न शोचति, आचार्यवचने च रमते, रागद्वेषौ च न कुरुते, तं वयं

जयघोषस्य वैराग्यं

॥२६८॥



श्रीउत्तरा० चूर्णौ २६ सामाचारी ॥२६९॥

कर्म्मब्राह्मणं प्राणातिपातादिविरतं, वयं इमं ब्राह्मणं पशुबंधादिपापकर्म्मरहितं, निरतं न तं ब्राह्मणं ब्रूमः, एवं जयघोषेण विजयघोषो भवति प्रतिपादितः, तस्यैव सकाशे प्रव्रजितः, तपः कृत्वा 'खवित्ता पुव्वकम्माइं'इत्यादि गताथाः (९९१।५३१) नयाः पूर्ववत् ॥ जण्णइज्जं नाम पंचवीसइमममज्झयणं ॥

उक्तं पंचविंशतितमं, इदानीं षड्विंशतितमं, तस्य कोऽभिसंबंधः?, पंचविंशतितमे ब्रह्मगुणा व्यावर्णिताः, षड्विंशतितमे सामाचारी, ब्रह्मगुणावस्थितेन अवश्यमेव सामाचारी करणीया, अनेन संबंधेनायातस्यास्याप्यध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद्यावर्ण्यं नामनिष्पन्ने निक्षेपे सामाचारी'निक्खेवो सामंमि'इत्यादि गाथाद्वयं(४८३-४।५३३)व्यतिरिक्तं क्षीरशर्करादीनां सामभावो,भावसामं इच्छामिच्छादिकं,'आयारे निक्खेवो'इत्यादिगाथात्रयं ४८७-८-९।५३३ व्यतिरिक्तो नामादि,नामने तिणिसलता,धोवने हरिद्रारागः, वासने कपिल्लकादि,शिक्षापने शुकसारिकादि,सुकरणे सुवर्णादि लब्धि(दध्ना)सार्द्धं गुडाः,एष द्रव्याचारः, भावे दशविधसामाचार्याचरणं, उक्तो नामनिष्पन्नो निक्षेपः,इदानीं सूत्रालापकस्यावसरः,अस्माद्यावत् सूत्रं निपतितं तावक्तव्यं, सूत्रं चेदं-'सामायारिं पवक्खामि'इत्यादि(९९२-५३४)सर्वं प्रायः गतार्थं,तथापि यत् किंचिद्वक्तव्यं तदुच्यते-दिवा पौरुषिप्रमाणं छायया ज्ञायते,आसाढमासे इत्यादि प्रयोगेण,रात्रौ पुनः कथं नातं तद्?, उच्यते,यन्नक्षत्रं रात्रिं परिसमापयति तस्मिन्नक्षत्रे चतुर्भागे स्थिते प्रथमप्रहरः कालिकश्रुते तस्य तस्मिन् स्वाध्यायः क्रियते, तस्मिन्नेव नक्षत्रे नभोमध्ये स्थिते अर्द्धरात्रः, तस्मिन्नेव नक्षत्रे चतुर्भागे शेषस्थिते पश्चिमः प्रहरः,दशविधा सामाचारी चक्रवालसामाचारी न अत्राभिहिता, (ओघरूपा च) तौ च आवश्यकानुसरेण ज्ञातव्याविति, नयाः पूर्ववत्, षड्विंशति-तमं सामाचारीनामकं समाप्तं ॥

जयघोषस्य वैराग्यं

॥२६९॥


अध्ययनं -२५- परिसमाप्तं

अत्र अध्ययन -२६- "सामाचारी" आरभ्यते

अध्ययनं -२६- परिसमाप्तं

प्रत सूत्रांक [१२...] गाथा ||१०४४-१०६०||

दीप अनुक्रम [१०५९-१०७५]



श्रीउत्तरा० चूर्णौ २७ खलुंकीये ॥२७०॥

इदानीं सप्तविंशतितमं, तस्य कोऽभिसंबंधः?, षड्विंशतितमे सामाचारी अभिहितेति सप्तविंशतितमे अशठता व्यावर्णिता, सा च साधुना सर्वप्रयोजनेषु कर्त्तव्या, अनेन संबंधेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद्यावर्ण्य नामनिष्पन्ने निक्षेपे 'खलुंकिज्जंमि' इत्यादि गाथाद्वयं (४९०-१।५४८) व्यतिरिक्तो बलीवर्दो मायी, खुलुंका गली मरालो शठो प्रतिलोमे अविनीत इत्येकार्थः, भावे खलुंको प्रतिलोमो, सर्वेषु मोक्षप्रयोजनेषु खलप्रकार 'अवदाली' इत्यादि (४९२-५४८) अवदाली स्कंधानुयुगं योत्रं च सुविण्णासति, उन्नसति, योत्रं युगं च भांडं भनक्ति, उत्पथेन गच्छति, विपथेन-विषमेण पथा गच्छति,'जं किर दव्वं खुज्जं'इत्यादि गाथाद्वयं(४९३-४।५४८)गतार्थं, 'दंसमसक' इत्यादि (४९५।५४८) दंसमसकतुल्या जात्यादितुदनसीला,जलूकतुल्या दोषग्राहिनः, कपिकतुल्या असमाधिकारिणः,'तीक्ष्णा' निस्त्रिंशा मृदवः अत्यंतं अज्ञाः चंडा-रोषणाः मार्दविका-अत्यंतमलसा, एते भाव-खलुंका । 'जे किर गुरुपडिणीया' इत्यादि गाथात्रयं(४९६-७-८।५४८)गतार्थं,उक्तो नामनिष्पन्नो निक्षेपः, इदानीं सूत्रालापकस्या-वसरः, अस्माद्यावत् सूत्रं निपतितं तावद्वक्तव्यं,सूत्रं चेदं-'थेरे गणधरे गग्गे'इत्यादि (१०४४ ५५०) स्थिरीकरणात् स्थविरः, गणं धारयतीति गणधरः-गणी, गच्छआचार्य इत्यर्थ , गर्गसगोत्र इति, मन्यते त्रिकालावस्थितं जगदिति मुनिः, विशारद हेतोः, संग्रहो-पग्रहकुशल इत्यर्थः, गणिभावं प्रति आकीर्णः, सुतरां आचार्यगुणोपेतः, ज्ञानादिसमाधिकारकः, स इदानीं आचार्यः शिष्यस्योपदेशं ददाति-वहनं-रथादि तस्मिन् युक्तस्य बलीवर्दादेर्वहत यातव्योपदेशः अभिवर्त्तते, अथ न वहते तत् तस्यैवाशोभनं भवति, एवं शिष्यस्यापि संयमयोगान् सम्यग्वहतः संसारच्छेदो भवति, यः पुनः संयमयोगेषु अविनीतान् खलुंकान् योजयति असौ विधि-चोदनामपि कुर्वन् क्लिश्यति, असमाधिं च लभते, लाघवं च प्राप्नोति, वक्ष्यमाणबलीवर्दसदृशाः कुशिष्या भवंति, ते च इमे


निक्षेपादि शैक्षदुष्टता च

॥२७०॥

अत्र अध्ययन -२७- "खलुंकिय" आरभ्यते

प्रत सूत्रांक [१२...] गाथा ||१०४४-१०६०||

दीप अनुक्रम [१०५९-१०७५]



श्रीउत्तरा० चूर्णौ २८ मोक्षमार्ग. ॥२७१॥

'एगं डसति पुच्छंमि'(१०४७-५५२)इत्यादि गाथा सर्वा. एकं बलिवर्दविशेषं पुच्छे पीलयति, अन्यमभीक्ष्णं तुदयति, अन्यदतस्तत्र दुष्टस्तत्कारणं कृत्वा पार्श्वस्थं उल्लंघ्य नश्यति, एवमादि कियत् वर्णयिष्यामि, यादृशास्ते दुष्टबलीवर्दा दुष्टशिक्षा अपि तादृशा एव, धर्म्मयाने वा योजिता भज्यन्ते धृतिदुर्बला एभिः कारणैर्भज्यन्ते, रिद्धिरससातागुरुत्वात् , सबलशीलत्वात् , क्रोधनत्वात् , भिक्षाऽलसिकत्वात्, स्वपक्षपरपक्षमानभीरुकत्वाद्भज्यन्ते, अन्यैः अनुशास्यमानोऽपि अन्तरभाषया दोषोद्घट्टनान् कुरुते, आचार्याणां वचनं प्रतिकूलयति, कथं ?, क्वचित् प्रेष्यमाणो ब्रवीति-नासौ ममं जानाति, अथवा नासौ मम दास्यति, अथवा निर्गता सा एवमहं मन्ये, अन्यं तत्र प्रेष्यतां, प्रेष्यमानो प्रतिकूलयति, ततः स्वच्छन्दी सुखं विहरति, राजवेष्टिमिव मन्यमानो भृकुटिं कुर्वति, आचार्येण वाचिता संगृहीता भक्तपानेन पोषिता जातपक्षा पलायंते हंसा इव दिशोदिशं, ततो आचार्या विचिंतयंति-खलुंकैः सह समागतः किं मम दुष्टशिष्यैः?, आत्मा मेऽवसीदति-' यादृशा मम शिष्यास्तु, तादृशा गलिगर्दभा । गलिगर्दभं परित्यज्य,दृढं गृह्णात्यसौ तपः॥१॥आचार्यः मृदुगंभीरसुसमाहितः शीलसमाहितो विहरतीति,नयाःपूर्ववत् । **सप्तविंशतितमं समाप्तम्**॥

उक्तं सप्तविंशतितमं, इदानीमष्टाविंशतितमं, तस्य कोऽभिसम्बन्धः ?, सप्तविंशतितमे अशठता व्यावर्णिता, अष्टाविंशतितमे मोक्षमार्गोऽभिधीयते, मोक्षमार्गोऽशठस्यैव भवति, अनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद्व्याव्यर्ण्य नाम-निष्पन्ने निक्षेपे मोक्खमग्गगती-'णिक्खेवो मोक्खंमि०'॥४९९-५००-५५५॥ इत्यादि, गाथाद्वयं, ज्ञभव्यव्यतिरिक्तो निगलादिषु, भावमोक्खो-अट्ठविहकम्ममुक्को नायव्वो भावमोक्खो, 'निक्खेवो मग्गंमि०' ॥५०१-२।५५५॥ इत्यादि गाथाद्वयं, व्यतिरिक्तो जले स्थले वा, भावमार्गो ज्ञानदर्शनचारित्राणि, 'निक्खेवो उ गतीए०' ॥ इत्यादि गाथात्रयं (५०३-४ ५) व्यतिरिक्तं जीवानां

निक्षेपादि शैक्षदुष्टता च

॥२७१॥

अध्ययनं -२७- परिसमाप्तं

अत्र अध्ययन -२८- "मोक्षमार्गगति" आरभ्यते

पुद्गलानां वा गतिः, भावगती पंचप्रकारा, मोक्षगतीए अधिकारो, उक्तो नामनिष्पन्नो निक्षेपः, इदानीं सूत्रालापकस्यावसरः, अस्माद् यावत् सूत्रं निपतितं तावद्वक्तव्यं, सूत्रं चेदं- 'मोक्खमग्गगतिं तच्चं०' ॥१०६१-५५६॥ इत्यादि, सर्वं प्रायः प्रकटार्थं, तथापि यत्किंचिद्वक्तव्यं तदुच्यते, चत्तारि कारणा ज्ञानदर्शनचारित्रतपांसि चतुष्टयमपि, ज्ञानदर्शनलक्षणं कथं ?, येन ज्ञान-दर्शनाभ्यां विना आत्मभावं न लभेत, गुणानामाश्रयो द्रव्यं, जीवद्रव्यस्य ज्ञानादयो गुणाः, अजीवद्रव्यस्य रूपादयः गुणा, द्रव्या-सृताः पर्यायासृताश्च, पर्यायाः गुणाश्रिताश्च, धर्माधर्माकाशानि एकद्रव्यानी,न तेषां स्वतः प्रदेशकल्पना विद्यते,जीवाः पुद्गलाः कालाश्च अनन्तानि,वर्त्तनालक्षणः कालः बालयुवावृद्धत्वादिभिर्लक्षणैर्लक्ष्यते,पुद्गललक्षणं तत्रान्धकारआतपोद्योतादीनि, पर्यायलक्षणं एकत्वं पृथ-क्त्वं एकद्वित्र्यादिका संख्या संस्थानं-आकारविशेषः, संयोगवियोगौ, देवदत्तस्य गृहेण सह सम्बन्धः संयोगः, तस्माद् वियोगो विभागः, जीवादयस्तथ्याः पदार्थाः, तत्वा(थ्या)नां भावानां निसर्गादधिगमाद्वा शुद्धानां रुचिः सम्यग्दर्शनं, तद्दशप्रकारं निसर्गादि, कथं लक्ष्यते ?, तत्त्वानां भावानां गुणोत्कीर्त्तनेन सम्यग्ज्ञानानुष्ठानेन व्यापन्नकुदर्शनवर्जनेन च लक्ष्यते, सम्यग्दर्शनविरहितं चारित्रं न भवति, दर्शनं तु चारित्रविरहितमपि भवति, तथा ज्ञानं च दर्शनरहितं न भवति, ज्ञानेनापि विना चारित्रं न भवति, ज्ञानादिगुणविरहितस्य मोक्षो न भवति, अमुक्तस्य च निर्वृतिर्नास्ति, सुखं नास्तीत्यर्थः, ज्ञानादीनां विषयं प्रदर्शयति ज्ञानेन सर्व-पदार्थान् जानाति, दर्शनेन तानेव श्रद्धत्ते, चारित्रावस्थितस्यापूर्वपापग्रहणं न भवति, तपसा पूर्वोपात्तस्य कर्मणः क्षयं करोति । नयाः पूर्ववत् ॥ अष्टाविंशतितमं मोक्षमार्गगतिनामकमध्ययनं समाप्तं ॥

उक्तं अष्टाविंशतितमं, इदानीमेकोनत्रिंशत्तमं, तस्य कोऽभिसम्बन्धः?, अष्टाविंशतितमे मोक्षमार्गोऽभिहितः, एकोनत्रिंशत्तमे अवश्य-


अध्ययनं -२८- परिसमाप्तं

अत्र अध्ययन -२९- "सम्यक्त्व पराक्रम" आरभ्यते

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [१३-८८] गाथा ||१०९७||

दीप अनुक्रम [१११२-११८८]



श्रीउत्तरा० चूर्णौ ३० तपोमार्ग. ॥२७३॥

मेवाप्रमादः करणीयः, स एव मोक्षमार्गः, अनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद् व्यावर्ण्य नामनिष्पन्ने निक्षेपे अप्पमादज्झयणंति, आदानपदेनेदमध्ययनं सम्यक्त्वपराक्रममभिधीयते, गौणी संज्ञा अप्रमादश्रुतमिति, अन्ये तु वीतरागश्रुतमिति, तत्र द्रव्ये पत्रादिलिखितं, अथवा व्यतिरिक्तं सूत्रं प्रंचप्रकारं-अंडजादि, उक्तो नामनिष्पन्नो निक्षेपः, इदानीं सूत्रालापकस्यावसरः,अस्माद्यावत् सूत्रं निपतितं तावद्वक्तव्यं,सूत्रं चेदं-'सुतं मे आउसं! तेण'(१३सू०५७२)मित्यादि सर्वं, सम्यक्त्वसहितस्य पराक्रमः सम्यक्त्वपराक्रमः, पराक्रमः- उत्साहो, वक्ष्यमाणेषु प्रयोजनेषु उत्साहः करणीयः, प्रत्येककारणानि सिद्धयन्ति, संसारे स्थितश्च भवति संविग्नः, ' ओविजी भयचलनयोः' संसारोद्विग्नः, उक्तंच-' यथा मृगा मृत्युभयस्य भीता, उद्विग्नवासा न लभन्ति निद्राम् । एवं बुधा ज्ञानविबोधितात्मा, संसारभीता न लभन्ति निद्रां ॥१॥" संवेगेन कृतेन को गुणो भवति ?, तदुच्यते-' संवेगेणं भंते! (जीवे)किं जणयति?, गोयमा! संवेगेणं रुद्धा जणयति'(१५सू०५९८ एवं सर्वेषु पदेषु पुच्छानिबन्धनं वाच्यं,निव्वेतेण सातासौख्यात् गृहस्वजनबन्धुच्च निर्वेदं करोति, निर्विण्णः सन् धर्म्मे उद्यमं करोति, भावसत्यं प्रतिलेखनादिक्रियां यथोक्तां सम्यगुपयुक्तः करोति, योगा-मनोवाक्कायाः, सत्यमनोयोगः कर्त्तव्यः, नासत्यमनोयोगः, एवं वागपि, काये लंघनप्लवनडेवनादि न करोति, एवं यावत् संभोगभत्तपच्चक्खाणेणं अणियट्टिं जणयति, अत्र प्रवृत्तौ प्रत्याख्यानशब्दो, यथा अम्बुव्रतो, अनिवृत्तिश्च तस्मिन् सयोगे भवति ' सेलेसी णं भंते ! किं जणयति ?, अकम्मताए जीवा सिज्झंति बुज्झंति मुच्चंति परिनिव्वायंति सव्वदुक्खाणं अंतं करेंति, ब्रवीमीति, नयाः पूर्ववत् ॥ समाप्तं एकोनत्रिंशत्तमम् ॥

उक्तं एकोनत्रिंशत्तमं, तस्य कोऽभिसम्बन्धः ?, एकोनत्रिंशत्तमे अप्रमादो व्यावर्णितः, त्रिंशत्तमे तपोऽभिधीयते, तच्च तपः

संवेगादि

॥२७३॥

अध्ययनं -२९- परिसमाप्तं

अत्र अध्ययन -३०- "तपोमार्गगति" आरभ्यते

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [८८...] गाथा ||१०९८-११३४||

दीप अनुक्रम [११८९-१२२५]

श्रीउत्तरा० चूर्णौ ३१ चरणवि० ॥२७४॥

अप्रमादसहितस्यैव भवति, अनेन सम्बन्धेनायातस्याध्ययनस्यानुयोगद्वारचतुष्टयं (५१३-४-५-६।५९९) पूर्ववद् व्यावर्ण्य नामनिष्पन्ने निक्षेपे तपोमार्गगती ' णिक्खेवो तु तवंमी ' त्यादि, गाथाचतुष्टयं, व्यतिरिक्तो पंचतपादि, भावे द्वादशविधं तप: शेषं गतार्थं, उक्तो नामनिष्फण्णो निक्षेप:, इदानीं सूत्रालापकस्यावसर:, अस्माद् यावद् सूत्रं निपतितं तावद्वक्तव्यं, सूत्रं चेदं-'जहा य पावगं कम्मं ' इत्यादि(१०९८।६००)सर्वं,'तप संतापे' तपसो मार्ग: तपोमार्ग:, गमनं गति:, तपोमार्गस्य गति: २, तपो येन प्रकारेण क्रियते इत्यर्थ:, यदि पूर्वं संवृताश्रवद्वार: तत: तपसा नि:शेषं कर्म्म क्षपयति, प्राणिवधादीन्याश्रवद्वाराणि, अनशनं द्विविधं-इत्वरं यावत्कथितं च, इत्वरं चतुर्थादि, तदा अनेन प्रकारेण षड्विधं भवति श्रेण्यादि, चतुर्थषष्ठाष्टमादि षण्मासपर्यवसाना श्रेणी, श्रेणी श्रेण्या गुणिता प्रतरं भवति, प्रतरं श्रेण्या गुणितं घनं भवति, तदा घनो वर्गितो वर्गो भवति, सोऽपि वर्ग: पुनरपि वर्ग्यते ततो वर्गवर्गो भवति, षष्ठोऽपि चित्तो नानाप्रकारो प्रकीर्णतपोऽभिधीयते, तदन्यत्राभिहितं, शेषं दशवैकालिकचूर्णौ अभिहितं, एवमेवं तु द्विविधं, जे सम्मं आयरे मुणी। से खिप्पं संसारा मुंचति पंडितेत्ति बेमि, नया: पूर्ववत् ॥ इति त्रिंशत्तमं अध्ययनं समाप्तम्

उक्तं त्रिंशत्तमं, अथैकत्रिंशत्तमं, तस्य कोऽभिसम्बन्ध:?, त्रिंशत्तमे तपोमार्गगतिरभिहिता, एकत्रिंशत्तमे चरणविधिरभिधीयते, तपसा च विना चरणं नैव सम्पूर्णं भवति, अनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद् व्यावर्ण्य नामनिष्पण्णे निक्षेपे चरणविधिरिति,'निक्खेवे चरणम्मि'इत्यादि गाथा पंच (५१७-८-९-२०-२१।६११) व्यतिरिक्ते चैत्यवन्दनको गच्छति,मोदकं भक्षयति, भावे पंचविधमाचारमाचरति, व्यतिरिक्ते इन्द्रियार्थानां विधि:, भावे संयमयोगस्य तपसश्च यो विधि:, उक्तो नामनिष्फ-

तपोवर्णनं.

॥२७४॥

अध्ययनं -३०- परिसमाप्तं

अत्र अध्ययन -३१- "चरणविधि" आरभ्यते

प्रत सूत्रांक [८८...] गाथा ||११३५-११५५||

दीप अनुक्रम [१२२६-१२४६]

श्रीउत्तरा० चूर्णौ ३२ प्रमादश्रुतं ॥२७५॥

ण्णो निक्षेपः॥ इदानीं सूत्रालापकस्यावसरः, अस्माद् यावत् सूत्रं निपतितं तावद्वक्तव्यं, सूत्रं चेदं-'चरणविधिं पवक्ष्यामि' इत्यादि (११३५) सर्वं, असंयमाद् विरतः, संयमे प्रवर्त्तनं, मंडलग्रहणाच्चातुरंतः संसारः परिगृह्यते, नारकतिर्यग्योनिमनुष्यामरभावः, पिंडेषणायां अवग्रहप्रतिमासु भयस्थानेषु ब्रह्मगुप्तिषु च एवं प्रतिक्रमणानुसारेण ज्ञेयं, इत्येतेषु स्थानेषु यः प्रयत्नं करोति असौ संसाराद् विमुच्यते इति ब्रवीमीति, नयाः पूर्ववत् ॥ इति एकत्रिंशत्तमं अध्ययनं समाप्तम् ॥

उक्तं एकत्रिंशत्तमं, इदानीं द्वात्रिंशत्तमं, एकत्रिंशत्तमे चरणविधिरभिहिता, द्वात्रिंशत्तमे प्रमादस्थानान्यभिधीयंते, चरणं च अप्रमत्तस्यैव सम्पूर्णं भवति, अनेन सम्बन्धेनायातस्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद् व्यावर्ण्य नामनिष्पन्ने निक्षेपे प्रमादस्थानं, 'निक्खेवो उ पमाते' इत्यादि गाथा अष्ट ॥ (५२२-३--४-५-६-७-८-९।६२०) ॥ व्यतिरिक्तो द्रव्यप्रमादः मद्यमधुप्रसन्नादि, भावप्रमादः निद्रा विकथा कषाये इन्द्रियाणां च क्रियास्थानं पूर्वोक्तं, तीर्थकराणां अप्रमत्तता व्यावर्ण्यते, ऋषभस्वामिनो वर्षसहस्रेऽपि संकलिज्जमाणे अहोरात्रं प्रमादः, वर्द्धमानस्वामिनः द्वादशसु वर्षेषु समधिकेषु संकलिज्जमाणे अन्तर्मुहूर्तं प्रमादो, ये पुनर्नित्यं प्रमादास्ते संसारसागरं पर्यटन्ति, उक्तो नामनिष्पन्नो निक्षेपो, इदानीं सूत्रालापकस्यावसरः, अस्माद् यावत् सूत्रं निपतितं तावद् वक्तव्यं, सूत्रं चेदं-'अच्चंतकालस्स०'॥११५६-६२२॥इत्यादि, सर्वं, अत्यन्तकालः अतीतोऽनागतो वर्त्तमानः परिगृह्यते, समूलस्य सर्वदुःखस्य यः प्रमोक्षस्तस्य, सर्वमूलस्येति दुःखस्य मूलं कर्म्म, कर्म्मणो मूलं रागद्वेषौ, तौ छित्त्वा भवति मोक्षो तन्मे प्रतिपादयितुः एकान्तहितं शृणुत, स मोक्ष एवं भवति ज्ञानप्रभावनया अज्ञानमृषावर्जनेन रागद्वेषक्षयेण गुरुवृद्धसेवया बालजनवर्जनेन स्वाध्यायेन धृत्या च भवति, तथा आहारेण मितेन एषणीयेन च, निपुणार्थे बुद्धिर्यस्य स सेव्यो गीतार्थः, निकेतनं-स्थानं तद्विवेकयोग्यं समाधि-

असंयमादि ॥२७५॥

अध्ययनं -३१- परिसमाप्तं

अत्र अध्ययन -३२- "प्रमादस्थान" आरभ्यते

प्रत सूत्रांक [८८...] गाथा ||११५६-१२६६||

दीप अनुक्रम [१२४७-१३५७]

कामो भजते, रागद्वेषौ कर्म्मबीजं, मोहप्रभवं कर्म, कर्म च जातिमरणस्य मूलं, जातिमरणं दुःखमूलं, रागद्वेषौ मोहश्च यथा उद्धियते तमुपायं वक्ष्ये, रसा ते कामं न निषेवणीया, आसेविता दीप्तिकरा भवन्ति, प्रीणितं कुर्वन्तीत्यर्थः, प्रीणितं च कामा समभिद्रवन्ति, द्रुमं यथा स्वादुफलं हि पक्षिणः, यथा दवाग्निः प्रचुरेंधनः समारुतो नोपशमं गच्छति, तथेन्द्रियाग्निरपि प्रकामभोजने शमं न गच्छति, विविक्तशय्यासनयंत्रितानां ओमाशणाणं दमितेन्द्रियाणां रागादयो नाभिभवन्ति चित्तं, पराजितो व्याधिरिवौषधीभिः ये इन्द्रियाणां विषया मनोज्ञा न तेषु रागं करोति, अमनोज्ञेषु च द्वेषं, तदाऽसौ समो भवति, चक्षु रूपं गृह्णाति, रूपेणापि गृह्यते चक्षुः, रूपेषु यो गृद्धिमुपैति तीव्रां स शीघ्रमेव विनश्यति, आलोकलोलो यथा पतंगः, रूपानुगतोऽसौ चराचरप्राणिनो हिनस्ति, तस्माद्रागानुगतस्य परिग्रहो दोषः, यस्य जायते परिग्रहादत्ताहारित्वं ततो मृषावादः, एवं रागद्वेषानुगतो बहुकर्म्मसंचयो भवति, रूपाद्विरक्तो विशोको भवति, दुःखौघपरंपरेण च न लिप्यते, जलेन वा पद्मिनीपत्रं, एवं श्रोत्रघ्राणजिह्वास्पर्शा, विनाशमागच्छति इहलोके परलोके च, इहलोके तावत् शब्दान् मृगो घ्राणान्मधुकरः मच्छो जिह्वया गजो स्पर्शेन, इहलोके एवं विनाशमागच्छन्ति, निश्चयेन न ते दोषमुत्पादयन्ति, किन्तु यस्तेषु रागं द्वेषं वा करोति स बध्यते, एवं क्रोधादयोऽपि कर्म्मबन्धहेतवो भवन्ति, यः पुनर्विरक्तभावः स कर्म्मबन्धेन न लिप्यते, ततः शुभाध्यवसायिनः क्षपकश्रेण्यनुप्रवेशः,ततः क्रमेण मोहनीयज्ञानावरणीयदर्शनावरणी-यांतरायेषु क्षयं गतेषु केवलं-सम्पूर्णं ज्ञानमुत्पद्यते, तत आयुषः क्षयात् सादिकमनन्तमव्याबाधं निर्वाणसुखं प्राप्नोति, एवं अनादि-कालप्रभवस्य मोक्षो व्याख्यातः, येन अत्यन्तसुखिनः सन्त्वा भवन्ति। इति ब्रवीमि, नयाः पूर्ववत्॥ समाप्तं द्वात्रिंशत्तममध्ययनं॥

उक्तं द्वात्रिंशत्तमं, इदानीं त्रयस्त्रिंशत्तमं उच्यते, तस्य कोऽभिसम्बन्धः?, द्वात्रिंशत्तमे प्रमादोऽभिहितः, त्रयस्त्रिंशत्तमे कर्म्मा-

अध्ययनं -३२- परिसमाप्तं

अत्र अध्ययन -३३- "कर्मप्रकृति" आरभ्यते

ण्यभिधीयन्ते, प्रमादवशगो जीवः कर्म्म बध्नाति, अनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद् व्यावर्ण्य नाम-
निष्पन्ने निक्षेपे कम्मपगडी 'कम्ममि निक्खेवो०'॥ इत्यादिगाथा अष्ट (५३०.१-२-३-४-५-६-७।६४० निर्युक्तौ)) व्यतिरिक्तं कर्म
द्रव्यं च नोकर्म्मद्रव्यं, अनुदयः कर्म्मणो, नोकर्म्मद्रव्यं लेप्यकर्म्मादि, भावे कर्म्मणां उदयः, व्यतिरिक्तो द्रव्यप्रकृतिः कर्मणो कर्मा-
भ्यां कर्मणि अनुदयः, नोकर्म्म ग्रहणप्रायोग्यानि मुक्तानि द्रव्याणि, भावे मूलोत्तरप्रकृतीनां उदया,– पयतिट्ठिति अणुभागो
पदेसकम्मं च सुट्ठु णाऊणं । एतेसि संवरे खलु खवणे उ सयावि जइतव्वं॥१॥ उक्तो नामनिष्पन्नो निक्षेपः, इदानीं सूत्रालापकस्या-
वसरः, अस्माद्यावत्सूत्रं निपतितं तावद्वक्तव्यं, सूत्रं चेदं-'अट्ठ कम्माइं वोच्छामी' त्यादि(१२६७-६४१) सर्वं, तेषां कर्म्मणां चतुः-
प्रकारो बन्धो भवति प्रकृतिबन्धः स्थितिबन्ध अनुभागबन्ध प्रदेशबन्ध इति, प्रकृतिशब्देन स्वभावो भेदश्चाभिधीयते, स्थितिः
कालावस्थानं, अनुभावो यो यस्य कर्म्मणः शुभो अशुभो वा विपाकः, प्रदेशबन्धः जीवप्रदेशानां कर्म्मपुद्गलानां च सम्बन्धः, तत्र
प्रकृतिबन्धो द्विविधः मूलोत्तरभेदः, अष्टौ मूलप्रकृतयः, तद्यथा-ज्ञानावरणीयं दर्शनावरणीयं वेदनीयं मोहनीयं आयुष्कं नामं गोत्रं
अन्तरायमिति, ज्ञानमावृणोतीति ज्ञानावरणीयं, दर्शनमावृणोतीति दर्शनावरणीयं, वेदनां करोतीति वेदनीयं, मुह्यतीति मोहनीयं,
येन नारकादिभावस्तिष्ठति तदायुष्कं, गतिजात्यादिभिः प्रकारैर्नामयतीति नाम, प्रधानमप्रधानं वा करोतीति गोत्रं, अन्तरायं
करोतीति अन्तरायिकं, इदानीं उत्तरप्रकृतयोऽभिधीयंते-ज्ञानावरणं पंचप्रकारं आभिनिबोधिकश्रुतावधिमनःपर्यायकेवलानि, एषा-
मावरणं, दर्शनावरणं नवभेदं चक्षुरचक्षुरवधिकेवलानि तेषामावरणं, निद्रा निद्रानिद्रा प्रचला प्रचलाप्रचला स्त्यानर्द्धिरिति, एषामुदयं
करोतीति,वेदनीयं सातमसातं च,तयोरुदयं करोतीति,मोहनीयं अष्टाविंशतिभेदं,तत्समासतो द्विविधं-दर्शनमोहं चरित्रमोहं, दर्शनमोहं

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [८८...] गाथा ||१२६७-१२९१||

दीप अनुक्रम [१३५८-१३८२]

श्रीउत्तरा० चूर्णौ ३४ लेश्याध्य० ॥२७८॥

सप्तभेदं अनन्तानुबन्धिनः क्रोधमानमायालोभाः सम्यक्त्वं सम्यग्मिथ्यात्वं मिथ्यात्वं, चरित्तमोहनीयं एकविंशतिभेदं अप्रत्याख्यानाः क्रोधादयश्चत्वारः प्रत्याख्यानावरणा क्रोधादयश्चत्वारः संज्वलनक्रोधादयश्चत्वारः हास्यरत्यरतिभयशोकजुगुप्सास्त्रीपुंनपुंसकवेदा, एषामुदयादेतानि भवन्ति, आयुष्कं चतुर्भेदं नरकतिर्यग्योनिमनुष्यदेवानि, एषामुदयात्, नाम द्विचत्वारिंशद्भेदं शुभमशुभं च अनयोरुदयात्, गोत्रं द्विविधं, शुभमशुभं च अनयोरुदयात्, अन्तरायं पंचप्रकारं— दानलाभभोगोपभोगवीर्याणि च, एतान्यपि तदुदयादेव भवंति । इदानीं स्थितिबन्धोऽभिधीयते- णाणावरणीयस्य स्थितिः जघन्येनान्तर्मुहूर्त्तं उत्कृष्टेन त्रिंशत्सागरोपमकोटाकोट्यः त्रीणि च वर्षसहस्राणि आबाधा अंतरं भवति, बाधृ लोडने, न बाधा अबाधा, तत्र उदयो न भवतीत्यर्थः, तैश्च सत्स्थितिरूना भवति, एवं दर्शनावरणीयान्तराययोः, वेदनीयस्थितिर्जघन्येन द्वादश मुहूर्त्ता उत्कृष्टेन त्रिंशत्सागरोपमकोटीकोट्यः, शेषं तदेव, मोहनीयं द्विविधं-दर्शनमोहनीयं चारित्रमोहनीयं च, दर्शनमोहनीयं जघन्येनान्तर्मुहूर्त्तं उत्कृष्टेन चत्वारिंशत्सागरोपमकोटीकोट्यः, चत्वारि वर्षसहस्राण्याबाधा अन्तरं भवति, शेषं तदेव चारित्रमोहनीस्य जघन्येनान्तर्मुहूर्त्तं उत्कृष्टेन सप्ततिः सागरोपमकोटाकोट्यः, सप्त वर्षसहस्राणि आबाधा अन्तरं भवति, शेषं तदेव, आयुष्कस्य जघन्येनान्तर्मुहूर्त्तं उत्कृष्टेन त्रयस्त्रिंशत्सागरोपमाणि, नामगोत्रयोर्जघन्येन अष्टौ मुहूर्त्ता, उत्कृष्टेन विंशतिः सागरोपमकोटाकोट्यः, वर्षसहस्रद्वयं आबाधा अंतरं भवति, शेषं तदेव । ईर्यापथस्य कर्म्मणः स्थितिर्जघन्येन उत्कृष्टेन च समयः, अनुभावप्रदेशबन्धौ पूर्वोक्तौ, कर्म्मबन्धकरणानां संवरः करणीयः, बद्धानां क्षपनं प्रति यत्नः करणीय इति, ब्रवीमि, नयाः पूर्ववत् ॥ इति त्रयस्त्रिंशत्तममध्ययनं समाप्तम् ॥

उक्तं त्रयस्त्रिंशत्तमं,इदानीं चतुस्त्रिंशत्तमं उच्यते,तस्य कोऽभिसम्बन्धः?,त्रयस्त्रिंशत्तमे कर्मोक्तं, चतुस्त्रिंशत्तमे तत्कारणभूता लेश्या,

प्रमादवर्जनं


॥२७८॥

अध्ययनं -३३- परिसमाप्तं

अत्र अध्ययन -३४- "लेश्या" आरभ्यते

प्रत सूत्रांक [८८...] गाथा ||१२९२-१३५२||

दीप अनुक्रम [१३८३-१४४३]



श्रीउत्तरा० चूर्णौ ३५ अनगारा० ॥२७९॥

अनेन सम्बन्धेनायातस्याध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद् व्यावर्ण्य नामनिष्पन्ने निक्षेपे लेसज्झयणं, 'लेसाणं निक्खेवो०' (५३८-४७नि०६५१)इत्यादि गाथा दश,व्यतिरिक्ता द्रव्यलेश्या द्विविधा-कर्म्मलेश्या अकर्म्मद्रव्यलेश्या,अकर्म्मद्रव्यलेश्या द्विविधा-जीवानामजीवानां च, जीवलेश्या भव्याभव्ययोः, सा सप्तविधा,कृष्णादयः, सप्तमा संयोगजा, लेश्याप्रायोग्यद्रव्याणि परिगृह्यन्ते,जोगा बज्झा बज्झंतगा य पत्ता उदीरणावालियं(५४८)जीवलेश्या द्विविधा चन्दादि ग्रन्थत एव ज्ञायन्ते, कर्मद्व्यलेश्या षड्विधा कृष्णादि, अत्रापि जीवसंबद्धानि द्रव्याणि परिगृह्यन्ते,भावलेश्या द्विविधा-विशुद्धा अविशुद्धाः,उपशमे क्षये च, शेषं गतार्थं, उक्तो नामनिष्पन्नो निक्षेपः,इदानीं सूत्रालापकस्यावसरः,अस्माद्यावत् सूत्रं निपतितं तावद्वक्तव्यं, सूत्रं चेदं-'लेसज्झयणं पवक्खामी०' ॥१२९२-६५२॥ इत्यादि,सर्वं,लेश्यानां दश कारणानि नामादीनि वक्तव्यानि,कृष्णलेश्यावर्णःजीमूतो-मेघ,स च स्निग्धः,गवलं-महिषं शृंगं, रिष्ठो-द्रोण-काकः,कापोते कोइलछगो तेलंकरका,रसा जह कडुगतुंबगादी,गंधा गोमडातीं,स्पर्शा जहा करगयादि,परिणामो उत्तमाधममध्यमस्त्रिविधः, स एव त्रिभिर्गुणितो नवभेदो भवति, नव त्रिभिर्गुणिताः सप्तविंशतिः, सप्तविंशति त्रिभिर्गुणिता एकाशीति एकाशीतिस्त्रिभिर्गुणिता द्वे शते चत्वारिंशे भवतः, कृष्णाद्यास्तिस्रो लेश्या दुर्गतिगमनाय भवन्ति, लेश्यापरिणामस्य आदिसमये अन्तसमये वा न कश्चित् म्रियते, यदा तु अन्तर्मुहूर्ते गते शेषे वा भवति तदा परभवं गच्छति, अपसत्थाओ परिवज्जेजा, पसत्थाओ अहेट्ठए मुणित्ति, बेमि, नयाः पूर्ववत् ॥ इति चतुस्त्रिंशत्तमं अध्ययनं समाप्तम्

उक्तं चतुस्त्रिंशत्तमं, इदानीं पंचत्रिंशत्तमं, तस्य कोऽभिसम्बन्धः ?, चतुस्त्रिंशत्तमे लेश्याऽभिहिता, पंचत्रिंशत्तमे अणगार-गुणा अभिधीयन्ते, अनगारश्च अप्रशस्तलेश्याविरहितो प्रशस्यलेश्यायुक्तो भवति, अनेन सम्बन्धेनायातस्यास्याध्ययनस्य अनु-

प्रमादवर्जनं

॥२७९॥

अध्ययनं -३४- परिसमाप्तं

अत्र अध्ययन -३५- "लेश्या" आरभ्यते

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [८८...] गाथा ||१३५३-१३७३|| दीप अनुक्रम [१४४४-१४६४]

श्रीउत्तरा० चूर्णौ ३६ जीवाजीवः ||२८०||

योगद्वारचतुष्टयं पूर्ववद् व्यावर्ण्य नामनिष्पण्णे निक्षेपे अणगारमग्गगती 'अणगारे निक्खेवो०' ॥५४९-५०।६६३॥ इत्यादि गाथात्रयं, व्यतिरिक्तं निह्नवादि, भावे सम्यग्दृष्टिः अगारवासाद्विनिर्मुक्तः, उक्तो नामनिष्पण्णो निक्षेपः। इदानीं सूत्रालापकस्यावसरः, अस्माद्यावत् सूत्रं निपतितं तावद्वक्तव्यं,सूत्रं चेदं-'सुणेह मे एगमणे' इत्यादि (१३५३-६६८)सर्वं 'पंज संगे' एसो संगं ज्ञात्वा परिवर्जयेत्, एकान्ते, परेण आत्मार्थकृते वासं तत्राभिरोचयेत्, नैव स्वयं गृहाणि कुर्वीत नैव कारापयेत् नैवानुजानीयात्, यस्मात्तत्र त्रसस्थावराणां दृश्यते वधः, तथा भक्तपाने च करणकारणाणुमोदने त्रसस्थावराणां वधः, इन्धनं प्राप्य विसर्प्पते अग्निं, सर्वतो धारश्च, संयमयात्रार्थं भुञ्जीत, न रसार्थं, न वन्दनपूजनादि प्रार्थयेत्, धर्म्मशुक्ले ध्याने सदा ध्यायेत्, पश्चिमे काले आहारपरित्यागं कृत्वा, 'निर्ममो निरहंकारो, वीतरागो निराश्रवः। संप्राप्य केवलं ज्ञानं, शाश्वतं परिनिर्वृतः॥' इति ब्रवीमि, नयाः पूर्ववत्। इति पञ्चत्रिंशत्तमं अध्ययनं समाप्तम्॥

उक्तं पञ्चत्रिंशत्तमं, इदानीं षट्त्रिंशत्तमं, तस्य कोऽभिसम्बन्धः?, पञ्चत्रिंशत्तमे अनगारगुणा अभिहिताः, षट्त्रिंशत्तमे जीवाजीवविभक्तिरभिधीयते, अणगारेन च जीवाजीवविभक्तिर्ज्ञातव्या, अनेन सम्बन्धेनायातस्यास्य अध्ययनस्यानुयोगद्वारचतुष्टयं पूर्ववद् व्यावर्ण्य नामनिष्पन्ने निक्खेवे जीवाजीवविभक्तिः, 'निक्खेवो जीवंमि०'॥ (५५२-३।६७१)। इत्यादि गाथाद्वयं, व्यतिरिक्तं गुणपर्यायवियुक्तं जीवद्रव्यं, भावे गुणपर्यायसहितं,जीवपरिणामो दशविधः पंचेन्द्रियाणि क्रोधादयश्चत्वारः मनश्च, सहवर्त्तिनो गुणाः, क्रमवर्त्तिनः पर्याया,गुणाःप्रशस्ताःअप्रशस्ताश्च,प्रशस्ता ज्ञानाद्यो,अप्रशस्ता क्रोधादयः,पर्याया नरकादिभवाः,'निक्खेवो उ अजीवे०' ॥५५४-५।६७१॥ इत्यादि गाथाद्वयं,व्यतिरिक्तं गुणरहितं अजीवद्रव्यं, भावे गुणपर्यायसहितं अजीवद्रव्यं, परिणामो दशविधः शब्द-

प्रमादवर्जनं ||२८०||

अध्ययनं -३५- परिसमाप्तं

अत्र अध्ययन -३६- "अणगारगुण" आरभ्यते

रूपस्पर्शरसगन्धाः शुभा अशुभाश्च । 'निक्खेवो विभत्ती' इत्यादि गाथा सप्त (५५६-६२।६७१) विभजनं विभक्तिः, जीवानाम-जीवानां च भेदप्रत्याख्यापनं, जीवानां सिद्धानां असिद्धानां च, अजीवानां रूपीणामरूपीणां च, भावे भावानां विभक्तिः भावविभक्तिः, भावानां भेदप्रत्याख्यापनं, अत्राधिकारः जीवद्रव्यविभक्त्या अजीवद्रव्यविभक्त्या च, जे इति निर्देशे, किलशब्दः परोक्षवाची, एवं किल आचार्याः कथयन्ति-ये भव्यास्तेषामपि ये परीतसंसारिणो-भवाष्टाभ्यन्तरे सेत्स्यन्तो, पुनरपि भव्यग्रहणं येषां तदावरणीयकर्म्मणां क्षयोपशमो विद्यते,किल पठन्ति धीरा छत्तीसं उत्तरज्झाए,तम्हा जिणपण्णत्ते अणंतगमपज्जवेहिं संजुत्ते। अज्झाये जहजोग्गं गुरुप्पसाया अहिज्जंति॥१॥येषां सिद्धिर्भविष्यति, ये च गंठियसत्वा रागद्वेषबहुला ये च अणंतसंसारिणःते संकिलिट्ठकम्मा कर्मभिः ओतप्रोताः ते अयोग्याःउत्तराध्ययनानां,तस्माज्जिनप्रज्ञप्तं अनन्तगमपर्यायैः संयुक्तं तं स्वाध्याययोगेन यथायोगं यथाविधिं युञ्जीत, यो यस्याध्ययनस्य योगः तेन गुरुप्रसादादधीते,उक्तो नामनिष्पन्नो निक्षेपः। इदानीं सूत्रालापकस्यावसरः,अस्माद्यावत्सूत्रं निपतितं तावद्वक्तव्यं, सूत्रं चेदं-'जीवाजीवविभत्ती०' ॥१३७४ ६७२॥ इत्यादि,सर्वं, विभजनं विभक्तिः,भेदप्रत्याख्यापनमित्यर्थः, शृणुत तां मम, क एवमाह-सुधर्मस्वामी जम्बूनामं ब्रवीति, तं०-जीवाजीवात्मको लोकः, स च क्षेत्रकालभावादिभिरनुगन्तव्यः, अजीवाऽरूविणो दशविधा, धम्मत्थिकायाधर्मास्तिकायः सम्पूर्णः परिगृह्यते, देशः त्रिभागचतुर्भागादि, प्रदेशो निरंशः एव धर्मास्तिकायः, आकाशं च, कालो, दशधा, धर्म्माधर्मौ लोकालोकप्रमाणं, समयक्षेत्रे कालः, द्रव्यार्थिकनयाभिप्रायात्सर्वं अनाद्यपर्यवसितं, पर्यायार्थिकस्य सादिपर्यवसितं, रूपिणश्चतुर्विधा, स्कन्धो अचित्तमहास्कन्धादि सम्पूर्णः परिगृह्यते, देशस्त्रिभागचभतुर्भागादि, प्रदेशोऽसंख्येयतमोऽनन्ततमो वा प्रदेशः, परमश्चासावणुश्च परमाणु, निरंशः, क्षेत्रतः स्कन्धा, परमाणवः, लोकालोकौ भजनीयौ, कालतः

॥२८१॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [८८...] गाथा ||१३७४-१६४०||

दीप अनुक्रम [१४६५-१७३१]


सन्ततिं प्राप्य अनाद्यपर्यवसिताः, रूपिअजीवानां स्थितिर्जघन्येन समयः उत्कृष्टेन असंख्येयः कालः, अन्तरं जघन्येन समय उत्कृष्टेन अनन्तः कालो, भावतो वर्णगन्धरसस्पर्शसंस्थानादि परिणामः, वर्णः कृष्णादि, गन्धः सुरभ्यादि, रसः तिक्तादि, स्पर्शः कक्खडादि, संस्थानं परिमण्डलकादि, इदानीं संयोगः क्रियते-वर्णतो ताव किण्हे भयिते, स तु गन्धतो रसतो फासतो चेव भयिते, संठाणातोवि य, एवं नीललोहितहालिद्दसुक्किल्लसंठाणे भजना, संयोगः कर्त्तव्य इत्यर्थः, एवं वन्नगन्धरसफाससंठाणेहिं संजोया कायव्वा, एषा अजीवविभक्तिः समासतो व्याख्याता। इदानीं जीवविभक्तिरुच्यते-जीवा द्विविधाः-सिद्धा संसारिणश्च, सिद्धा परमार्थत एकाकारा एव, पूर्वभावप्रज्ञापनां प्रतीत्य भेदा अभिधीयंते-'इत्थी पुरिस सिद्धा य, तहेव य नपुंसगा। सलिंगे अन्नलिंगे य, गिहलिंगे तहेव य ॥१॥ उक्कोसियाए ओगाहणाए तह मज्झिमाए य। जहन्नाए य उड्ढं, अहो य तिरियं समुद्दंमि ॥२॥ दस चेव नपुंसेसु, वीसति इत्थीयासु य। पुरिसेसु अट्ठसतं, समएणेगेण सिज्झंति ३॥चत्तारि य गिहलिंगे, अण्णलिंगे दसेव य। सेणिमि य अट्ठसए, समएणेगेण सिज्झति ॥ ४ ॥ द्रव्यलिंगं प्रतीत्य इदमभिहितं, भावलिंगेन विना नास्ति सिद्धिः, उक्कोसयाए ओगाहणाए सिज्झंती जुगवं चेव। चत्तारि जहण्णा य जुगवं अट्ठुत्तरं सतं ॥ ५ ॥ चतुरो उड्ढलोगंमि, वीसपुहुत्तं अहे भवे। सतं अट्ठुत्तरं तिरिए, एगसमएण सिज्झती ॥४॥ दुवे समुद्दे सिज्झंति, सेसजलेसुं न यो(चउ)जणा। एसा उ सिज्झणा भणिता, जीवभावं पडुच्च उ॥७॥ संसारत्था जीवा द्विविधा- त्रसाः स्थावराश्च, स्थावरा तिविहा जीवा- पृथिवी आपो वनस्पति इति, त्रसा द्विविधा- तेजो वायवश्च कीर्त्तिता, द्वीन्द्रियादय- श्चतुर्विधाः, एषां भेदः भवस्थितेः आयु इतरं च विज्ञेयं ग्रन्थानुसारेणेति, जीवमजीवे एते णच्चा सद्दहिऊण य सव्वन्नूसंमतंमी जएज्जा, संजमे विद् एसेज्जा, तेणोवगते कालं किच्चाण संजते सिद्धे वा सासते भवति देवे वावि महिड्ढिए॥ इति पादुकरे बुद्धे,

॥२८२॥

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्ति: एवं जिनदासगणि-रचिता चूर्णि:

प्रत सूत्रांक [८८...] गाथा ||१३७४-१६४०||

दीप अनुक्रम [१४६५-१७३१]



श्रीउत्तरा० चूर्णौ ३६ जीवाजीवः ॥२८३॥

णातते परिनिव्वुते। छत्तीसं उत्तरज्झयणे,भवसिद्धिय सण्णिये॥१॥त्ति,इति परिसमाप्तौ उपप्रदर्शने च,प्रादुः प्रकाशे,प्रकाशीकृत्य-प्रज्ञाप-यित्वा बुद्धः-अवगतार्थः ज्ञातकः-ज्ञातकुलसमुद्भवः वर्द्धमानस्वामी, ततः परिनिर्वाणं गतः, किं प्रज्ञपयित्वा ?, षट्त्रिंशदुत्तराध्यय-नानि भवसिद्धिकसंमतानि-भवसिद्धिकानामेव संमतानि, नाभवसिद्धिकानामिति, ब्रवीम्याचार्योपदेशात्, न स्वमनीषिकया, नयाः पूर्ववत् ॥

वाणिजकुलसंभूओ, कोडियगणिओ उ वयरसाहीतो। गोवालियमहत्तरओ, विक्खाओ आसि लोगंमि ॥ १ ॥
ससमयपरसमयविऊ ओयस्सी दित्तिमं सुगंभीरो। सीसगणसंपरिवुडो वक्खाणरतिप्पिओ आसी ॥ २ ॥
तेसिं सीसेण इमं, उत्तरझयणाण चुण्णिखंडं तु। रइयं अणुग्गहत्थं, सीसाणं मंदबुद्धीणं ॥ ३ ॥
जं एत्थं उस्सुत्तं, अयाणमाणेण विरतितं होज्जा। तं अणुओगधरा मे, अणुचिंतेउं समारेंतु ॥ ४ ॥

षट्त्रिंशोत्तराध्ययनचूर्णी समाप्ता, ग्रन्थाग्रं ॥ ५८५० ॥ उत्तराध्ययनचूर्णिः संमत्ता ॥

सिद्धभेदाः

॥२८३॥


अध्ययनं -३६- परिसमाप्तं

उत्तराध्ययनचूर्णि: परिसमाप्ता

मुनि दीपरत्नसागरेण संकलिता: आगमसूत्र - [४३], मूलसूत्र - [०३] उत्तराध्ययन निर्युक्तिः एवं जिनदासगणि-रचिता चूर्णिः

प्रत सूत्रांक [--] गाथा ||--||

दीप अनुक्रम [--]



मुनिश्री दीपरत्नसागरेण पुनः संपादिता (आगमसूत्र ४३)

“उत्तराध्ययन-चूर्णिः” परिसमाप्ता:

नमो नमो निम्मलदंसणस्स

पूज्य आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्यो नम:

43

पूज्य आगमोध्धारक आचार्य श्री सागरानंदसूरीश्वरेण संशोधित: संपादितश्च

“उत्तराध्यनानि मूलसूत्र” [निर्युक्ति एवं जिनदासगणि-रचिता वृत्ति:]

(किंचित् वैशिष्ठ्यं समर्पितेन सह)

मुनि दीपरत्नसागरेण पुन: संकलित:

“उत्तराध्ययन” निर्युक्ति: एवं चूर्णि: नामेण

परिसमाप्ता

Remember it’s a Net Publications of ‘jain_e_library’s’